नं० ६८०-घ

वैराग्यशतकम् सटीकम् (काव्यम्)

त्राणि ५०

नं० ५८०-घ

पत्राणि ५० (सम्पूर्णम्)

कर्त्ता भर्तृहरिः

संवत् १८७५

वैराग्य शतकम्
By भर्तृहरि

गो·
वै·
१

ॐ श्रीगणेशाय नमः अथवैराग्यमारभते अथनमस्कारंचाह व्याख्या तस्मैशांतायतेजसे
परब्रह्मणेनमः किंविशिष्टाय शांतायतेजसे स्वानुभूत्येकमानाय स्वकीयायाः अनुभू
तेः अनुभवात् एकंमानंयस्य सः स्वानुभूत्येकमानः तस्मै स्वानुभवः पुनः किंवि

ॐ दिक्कालाद्यनवच्छिन्नानंतचिन्मात्रमूर्त्तये स्वानुभू
त्यैकमानाय नमः शांतायतेजसे १ राम राम॥

शिष्टाय शांतायतेजसे दिक्कालाद्यनवच्छिन्नानंतचिन्मात्रमूर्त्तये दिक् च कालश्च दिक्का
लौ दिक्कालाभ्यामनवच्छिन्ना अज्ञाता अनंता चिन्मात्रस्य मूर्ति यस्य सः दिक्कालाद्यनव
च्छिन्नानंतचिन्मात्रमूर्तिः तस्मै १ राम राम राम १

अथ गुणहीनतास्वरूपमाह व्याख्या बोद्धारो ज्ञातारो मत्सरग्रस्ताः विरोधव्यामाः प्रभवो नृपाः
स्मयदूषिताः गर्वकलङ्किताः चान्ये दन्ये अज्ञानोपहताः अङ्गे शरीरे सुभाषितं जीर्णं
स्फूर्तिहीनं एते प्रकाराः महिमानं न मामवंति १ संसारस्यानित्यतामाह संसारोत्पन्नं

बोद्धारो मत्सरग्रस्ताः प्रभवाः स्मयदूषिताः अज्ञानोपहतास्चान्ये जीर्णमंगे सुभा
षितं १ न संसारोत्पन्नं चरितमनुपश्यामि कुशलं विपाकः पुण्यानां जनयति भ
यं मे विमृशतः महद्भिः पुण्यौघैश्चिरपरिगृहीताश्च विषयाः महान्तो जायन्ते
व्यसनमिव दातुं विषयिणां २

चरितं कुशलेनानुपश्यामि पुण्यानां विपाकः फलं विमृशतो मे मम भयं जनयति संसारपरि
भ्रमणत्वात् कथं विशेषिचान्यत् महद्भिः पुण्यौघैः महान्तः पञ्चेन्द्रियगोचराः विषयाः चि
रपरिगृहीताः सन्तः विषयिणां प्राणिनां व्यसनं दातुमिव जायन्ते २ राम राम ॥

वै॰ शं॰ २

२

अथ तस्साधिकारमाह ॥ आख्या हे तस्से पापकर्मनिरते जंभणि सो लामे अथ यापिन सेनत्या॰
सिन सेनत्स्यामवक्षिन तेषान देशयाति हे तस्से अनेकदुर्गविषमे देशे भ्रांत्वा किंचित्कलन

भ्रांत्वा देशमनेकदुर्गविषमं प्राप्तं न किंचित्फलं त्यक्त्वा जातिकुलाभि
मानमुचितं सेवा कृता निःफला भुक्तं मानविवर्जितं परगृहे साशंक
याकाकवत्त तस्से जंभणि पापकर्मनिरते नाद्यापि संतुष्यसि ४

प्राप्तं हे तस्से उचितेयोगयं जातिकुलाभिमानं त्यक्तानिः फलासेवा कृता परगृहे मान॰
विवर्जितं साशंकया भुक्तं किंवत्काकवत तस्से सर्वमेतत तवेदं चेष्टितम ५ ॥

२

पुनराह हे तृष्णे त्वमधुना मां प्रत्यज कथं हे तृष्णे तव प्रभावात् निधिशंकया क्षितितलमुत्खातं
कथमप्यहं निधानं लभे यद्भनिवाञ्छया हे तृष्णे तव प्रेरणया गिरेर्धातवो ध्माताः कदा
चिदपि सौवर्णीरवनि लभे न चाप्यलाभे सति हे तृष्णे सरितां पतिः समुद्रो निस्तीर्णः

उत्खाते निधिशंकया क्षितितलं ध्माता गिरेर्धातवो निस्तीर्णः सरितां
पतिर्नृपतयो यत्नेन संतोषिताः मंत्राराधनतत्परेण मनसा नीता
श्मशाने निशाः प्राप्तः काणवराटकोपि न मया तृष्णेऽधुना मां त्यज ५

हे तृष्णे नृपतयो यत्नेन संतोषिताः हे तृष्णे मया श्मशाने निशा नीताः केन मंत्राराधन
तत्परेण मनसा तथापि मया काणवराटकोपि वर्षितकपर्दिका न प्राप्तः ५

पुनराह आत्मा हे आशे हे तृष्णे त्वं मोघाशासि निष्फलासि तेन मे अतो मां अपरं नर्त्तयसि किं
नर्त्तनं कारयसि कथं खलालापाः दुर्जनकठोरवाचः सोढाः अनुभूताः स्वैः कथमपि म
हता कष्टेन तदाराधनपरैः अपि पुनः शून्येन मनसा हसितं दन्तनिष्काशनेन कृतं ।

खलोलापाः सोढाः कथमपि तदाराधनपरैः निगृह्यान्तर्बाष्पं हसितमपि शू
न्येन मनसा कृतः चित्तस्तंभः प्रतिहतधियामञ्जलिरपि त्वमाशे मोघाशे कि
मपरमतो नर्त्तयसि मां ६

किं हत्वा अन्तर्मानं सेवायाम् मम अपाते निगृह्य धृत्वा चित्तस्तंभः स्तम्भमानं संविदये अ
पि पुनः प्रतिहतधियां गतबुद्धीनां पुरस्तात् अञ्जलिः कृतः एवं सत्यपि हे आशे न
कृतार्थासि ६

अथान्वयाह आरभ्या वयं ह्रास्यकृतार्जनैर्हृतैः हि निःस्थितेन भोगान्समीहामहे न वो।
क्षामहे दास्यत्वेन कृतमर्जनैः सम पार्जने येषां धनानां नानि दास्यकृतार्जनानि तैः याव
दमीभित्वा हृतानसम्भवः कृत्वा धनये भवंति संतोषाय स्युः यादेवीवाकस्य मतात्मनः कवी

मादिह्नेमधुनोच्छन्नादि रसवत्यनुत्तमवत्तरं देवीवागमतात्मनोरसवत स्तेनैव
रसावये कृत्वा यावदमीभवंति धनये भित्वा हृतानसम्भवः तावदास्यकृतार्जनैर्न
हि धनैर्भोगान्समीहामहे ८

स्वरस्य अंतरं समत्वमतिमत्तेनैवगवद्गणानावयं तस्मा संतनुः किंविशिष्टमंतरं मधुनो
पिस्तादिष्टं किंवत् छन्नादि रसवत् यथा छन्नादि रसः आदिशब्दात् क्षीर खंड छन्नानीव
किंविशिष्टस्य अमतात्मनः कवीश्वरस्य रसवतः नवरसमयस्य ८ राम ॥

वै॰ टी॰ ५

अथप्रमादमहिद्रपाह इदं जगत् उन्मत्तभूतं वर्त्तते किं कृत्वा मोहमयीं प्रमादमदिरां पीत्वा
कथमहरहः दिनं दिनं प्रति आदित्यस्य गतागतैः जीवितं संक्षीयते व्यापारैस्तु बहुका
र्यभारगुरुभिः व्यापारैः कालो न विज्ञायते च जन्मजरावियोगमरणं दृष्ट्वा त्रासो नोत्प
द्यते जन्म च जरा च वियोगश्च मरणं च जन्मजरावियोगमरणं अतः कारणात् प्रमादस्तम

आदित्यस्य गतागतैरहरहः संक्षीयते जीवितं व्यापारैर्बहुकार्यभारगुरुभिः का
लो न विज्ञायते दृष्ट्वा जन्मजरावियोगमरणं त्रासश्च नोत्पद्यते पीत्वा मोहमयीं प्र
मादमदिरामुन्मत्तभूतं जगत् ८

दिरा प्रोच्यते यथा मदिरापाणी ह्यालां पीत्वा चेतनां न धत्ते जीवितं संक्षीयमानेन नावगच्छ २
ति अन्यच्च यातं कालं न जानाति अन्यच्च त्रासेन नोत्पद्यते यथा प्रमादमदिरां जीवोऽ शु ब
न्मत्तो व्यतीयमानं जीवितं न वेत्ति व्रजन्तं कालमपि नाभिजानाति मरणादिभ्यः त्रासोऽपि न भ ५

अथ यामराट् को मनस्वी पुमान् को भिमानी पुरुषः स्वदग्धजठरस्यार्थे स्वकीयपट्टः शरोदराय इ
ति वदेत् देहीति किं कृत्वा गद्गदगलत्त्रुट्यद्विलीनाक्षरं यथा भवति गद्गदगलंति च
त्रुट्यंति विलयं गतानि अक्षराणि यत्र तत् गद्गदगलत्त्रुट्यद्विलीनाक्षरं केन याच्ञाभ
ङ्गभयेन याच्ञायाः भङ्गः याच्ञाभङ्गः तस्माद्भयं याच्ञाभङ्गभयं तेन याच्ञाभङ्गभयेन अथ

दीनादीनमुखैः सदैव शिशुकैराकृष्टजीर्णाम्बरा क्रोशद्भिः क्षुधितैर्नरैर्न विधुरा दृ
श्येत चेद्गेहिनी याच्ञाभङ्गभयेन गद्गदगलत्त्रुट्यद्विलीनाक्षरं को देहीति वदेत्स्व
दग्धजठरस्यार्थे मनस्वी पुमान् ४

चेत् यदि नरैर्मनुष्यैः गेहिनी गृहिणी सदैव सर्वदा क्षुधितैः शिशुकैः आकृष्टजीर्णाम्ब मि
रा सती मनी विधुरा न दृश्येत व्याकुला न विलोक्येत किं विशिष्टैः शिशुकैः क्रोशद्भिः गालि
ददद्भिः रुदद्भिः पुनः किं विशिष्टैः शिशुकैः दीनादीनमुखैः दीनानि च अदीनानि च
मुखानि येषां तानि दीनादीनमुखानि तैः दीना ॥ ४ ॥ राम राम ॥

स्तो॰ ५

अथानन्तरं व्याख्या अहो इति आश्चर्ये अयं कायः अयं देहः तदपि मरणापायचकितः ।
न दृष्टं किं निवृत्ता भोगेच्छा चास्मत्पुरुषबहुमानो विगलितः अन्यच्च समानाः समान-
वयसः सुहृदो मित्राणि स्वर्याताः स्वर्लोकं प्राप्ताः किं विशिष्टाः सुहृदः जीवितसमाः

निवृत्ता भोगेच्छा पुरुषबहुमानो विगलितः समानाः स्वर्याताः सपदि सु-
हृदो जीवितसमाः शनैर्यष्ट्युत्थानं घनतिमिररुद्धे च नयने अहो धृष्टः
कायस्तदपि मरणापायचकितः ५

प्राणतुल्याः यष्टिर्वेत्रं शनैरुत्थानं अर्थात् उपविशनं च चास्मत् नयने घनतिमिररु-
द्धे जाते तथाप्ययं कायः मरणाद्बिभेति मरणं नेच्छतीत्यर्थः किं विशिष्टः कायः धृष्टः

शिवस्तो॰ ५

अथ पुनरेतदाह व्यालानां सर्पाणां धात्रा विधात्रा अशनं भोजनं मरुत पवनः कल्पितं किं
विशिष्टमशनं हिंसारहितं पुनः किं विशिष्टमशनं अयत्नलभ्यं सुलभं तथाय पशवः तृणांकु
रभुजः बालतृणपल्लवभोजिनः सृष्टाः किं विशिष्टाः पशवः स्थलीशायिनः धात्रा विधाः

हिंसाशून्यमयत्नलभ्यमशनं धात्रामरुत्कल्पितं व्यालानां पशवस्तृणांकुर
भुजः सृष्टाः स्थलीशायिनः संसारार्णवलंघनक्षमधियां वृत्तिः कृता सा नृ
णां यामन्वेषयतां प्रयान्ति सततं सर्वे समाप्तिं गुणाः ॥

त्रा विधात्रा नराणां मनुष्याणां वृत्तिः साकापि दानिष्टा कृता यां वृत्तिं सततं निरंतरमन्वेषय
तां सर्वे गुणाः समाप्तिं यान्ति निष्टां यान्ति नाशं निष्टानिष्पत्तिनाशानाश्यन्ते स्मरः किं विशि
ष्टानां नराणां संसारार्णवलंघनक्षमधियां संसारसमुद्रतरणसमर्थबुद्धीनां ॥ ॥

वै॰ टी॰ ६

6

तदेवाह वयमेव निश्चयेन केवलं मानः यौवनवनच्छेदे कुठाराः जाताः स्मः इति शेषः कथं
यत्र ईश्वरस्य पदं परमानंदस्वरूपं शुद्धं ध्यानेन ध्यातं किमर्थं संसारविच्छित्तये संसारनि
स्ताराय अन्यच्च धर्मोऽपि नोपार्जितः न चाव नारीपीनपयोधरोरुयुगलं स्वप्नेऽपि नालिं

न ध्यातं पदमीश्वरस्य विधिवत्संसारविच्छित्तये स्वर्गद्वारकपाटपाटनपटुर्धर्मो
ऽपि नोपार्जितः नारीपीनपयोधरोरुयुगलं स्वप्नेऽपि नालिंगितं मातुः केवल
मेव यौवनवनच्छेदे कुठारा वयं ॥ भोगा न भुक्ता वयमेव भुक्ताः तपो न तप्तं व
यमेव तप्ताः कालो न यातो वयमेव याताः तृष्णा न जीर्णा वयमेव जीर्णाः

गितं अतः कारणात् मातुस्तारुण्यवनच्छेदे वयं शुद्धाः कुठारा एव ॥ अन्यच्चाह अस्माभि
भोगा न भुक्ताः वयमेव भुक्ताः तपो न तप्तं तदा वयमेव तप्ताः नारिकिकैः संतापिताः कालो
न यातः वयमेव याताः अधनमार्गयाताः इयं तस्मात् कदाचिदपि न जीर्णा वयमेव जीर्णाः ॥

अथात्मनो निरामयपदमाह अस्माभिः तदेवत तत्कर्मं कृतं तैस्तैः फलैः मुनिभिर्वंचिताः ।
स्मयत् यस्मात्कारणात् क्षान्तं क्षमया न क्षान्तं अन्यत् गृहोचितसुखं न त्यक्तं सन्तोषतः न सो-
ढ दुःसहशीतवाततपनसोढाः तपो न तप्तं अन्यच्च अहर्निशं नियमितैः निरुध्य यतः प्राणैः

क्षान्तं न क्षमया गृहोचितसुखं त्यक्तं न सन्तोषतः सोढा दुःसहशीतवातत-
पनक्लेशाः न तप्तं तपः ध्यातं वित्तमहर्निशं नियमितैः प्राणैर्न शंभोः पदं
तत्तत्कर्म कृतं तदेव मुनिभिस्तैस्तैः फलैर्वंचिता ॥ १४ ॥ वलीभिर्मुखमाक्रान्तं
पलितैः शिरः अंकितं गात्राणि शिथिलायन्ते तृष्णैका तरुणायते ॥ १५ ॥

वित्तं ध्यातं न शंभोः पदं अत एव प्राणिभिः तत्कर्मं कृतं येन कर्मणा तैस्तैः फलैर्वंचिताः ॥ १४ ॥ अथा-
न्यदाह मुखं वलीभिराक्रान्तं पलितैः शिरः अंकितं गात्राणि शिथिलायन्ते एका दशायां तस्मात् तरुणा

अथ यानि त्यजामहे निशि रात्रौ येनैवाम्बरखण्डेन चन्द्रमाः संवीतो गगनचारिणा तेनैवाम्बरखण्डेन दिवा वासरे भानुः सूर्यः संवीतो अहो इति खेदे एतयोः सूर्यचन्द्रमसोः दौर्गत्यं विलोक्यतां १५ अथ विषयविरक्तमाह एते विषयाः पञ्चाङ्गभोगलक्षणाः अवश्यं निश्चितं यातारः गमिष्यन्ति किं कृत्वा चिरतरं चिरकालमुषित्वापि स्थित्वापि तेन लोकः यत् अमून् वि-

येनैवाम्बरखण्डेन संवीतो निशि चन्द्रमाः तेनैव च दिवा भानुरहो दौर्गत्यमेतयोः
१५ अवश्यं यातारश्चिरतरमुषित्वापि विषयाः वियोगे को भेदस्त्यजति न
जनो यत्स्वयममून् व्रजन्तः स्वातन्त्र्यादतुलपरितापाय मनसः स्वयं त्यक्ता
ह्येते शमसुखमनन्तं विदधति १६ ॥

षयान् स्वयं न त्यजति तद्वियोगे को भेदः किन्तु विकां एते विषयाः स्वातन्त्र्यात् स्वाधीनात् आत्मवशात् व्रजन्तः गच्छन्तः मनसः आत्मनः अतुलपरितापाय भवति अथवा स्वयमुत्सृष्टाः हि निश्चितमेते स्वयं त्यक्ताः सन्तः अनन्तं शमसुखमुपशममविदधति अतः कारणात् एते

अथ तस्याधिक्यमाह तथा तस्या शमे उपशमे सति शाम्यति उपशमे गच्छति सति विवेकख्या कोशे विकाशे विदधति सति सा परिणतिः तस्या परिणामात् तुंगे परिष्वंगे आश्लेषे सति तरां प्रसरन्ति युक्तोयमर्थः अपराधिया विलासिनी भवति तुंगे परिष्वंगे सति तरां प्रसरन्ति तत्त्वज्ञाभिर्भजते लब्धावकाशात्वात् तथा सा तस्यापि महतां देवानामप्यधिपतिः १८:

विवेकख्याकोशे विदधति शमे शाम्यति तथा परिष्वंगे तुंगे प्रसरति तरां सा परि
णतिः जराजीर्णैश्वर्यग्रसनगहनात्तेपक्षपणः क्षपापात्रं यस्यां भवति महता
मप्यधिपतिः १८

यस्यां तस्यां क्षपापात्रं भवति केनमशङ्को भवतीत्यर्थः मनुजानां तु का कथा किं वि
शिष्टः महताधिपतिः जराजीर्णैश्वर्यग्रसनगहनात्तेपक्षपणः जरसा जीर्णमैश्वर्यं ज
राजीर्णैश्वर्यं तस्य ग्रसनेन यद् गहनं जराजीर्णैश्वर्यग्रसनगहनेन तस्मात्तेपक्षपणः
विघ्नमेत्य समर्थः अनङ्गकारणात् तस्मात् गरीयसी १८ ॥

वै॰ मदनं विनामाह आत्मा श्वाशुनीमन्वेति किंविशिष्टः स्वाभाकृशोदुर्बलः काणः एकदृ
टी॰ क् खंजो भग्नपादः श्रवणरहितः छिन्नकर्णः पुच्छविकलो लांगूलरहितः व्रणी पिचुकट
८ व्याप्तः स्फोटकव्याप्तः पूतिक्लिन्नः पिरूपवेष्टितः पुनरपि किंविशिष्टः श्वा कृमिकु
8

कृशः काणः खंजः श्रवणरहितः पुच्छविकलः व्रणी पूयक्लिन्नः कृमिकुल
शतैरावृततनुः क्षुधाक्षामो जीर्णः पिठरककपालार्पितगलः शुनीमन्वे
ति श्वा हतमपि च हंत्येव मदनः ॥ १८

लशतैरावृततनुः पुनरपि किंविशिष्टः क्षुधाक्षामः पुनरपि किंविशिष्टः श्वाजी वै॰
र्णः जराक्रान्तः पुनरपि किं श्वा पिठरककपालार्पितगलः कर्परकंठे समर्पितमुखः टी॰
एवंविधोमन्दकामोपि श्वा शुनीमन्वेति अनुसरति तदा मदनः एवंनिःस्वयेन हतमपि ८

पुनराह हाहा इति खेदे विषयाः तथापि न परित्यजंतीति वैरकेन मुंचंति न यथापि किं भिक्षाशनं
तदपि नीरसं रसरहितं तदप्यशनमेकवारं वारमात्र शय्या भूः अन्यच्च परिजनो निजदेहमा
त्रं चान्यत वस्त्रं शतखण्डमयी कंथा न यथापि विषयाः दुराशयाः विमोचयंति प्राणिनां १०

भिक्षाशनं तदपि नीरसमेकवारं शय्या च भूः परिजनो निजदेहमात्रं वस्त्रं च जीर्ण
शतखंडमयी च कंथा हाहा तथापि विषयान परित्यजंति १० स्तनौ मांसग्रंथी कन
ककलशावित्युपमितौ मुखं श्लेष्मागारं तदपि च शशांकेन तुलितं स्रवन्मूत्रक्लि
न्नं करिवरकरस्पर्द्धि जघनं मुहुर्निंद्यं रूपं कविजनविशेषैर्गुरुकृतं ११ ॥

अथ रूपतिरस्कारमाह अहो इति दुःखे रूपं निंद्यं कविजनविशेषैः गुरुकृतं कथं निंद्यं
स्तनौ मांसग्रंथी परमित्युपमितौ उपमानितौ इतीति किं कनककलशौ चान्यत मुखं श्ले
ष्मागारं तदपि च शशांकेन तुलितं चंद्रसमानं कृतं जघनं स्रवन्मूत्रक्लिन्नं तथापि क
रिवरकरस्पर्द्धि गजेंद्रशुंडादंडेन स्पर्द्धाकारकं रूपमिति स्वरूपं परं तु कविनाप्यावर्णितं

वै. नदेवाह् व्याख्या अहह इति खेदे मोहमहिमा गहनो वर्त्तते यतु शलभः पतंगः दीपशि
टी. खायां पतति शलभः किं कुर्वन् माहात्म्यम् अजानन् अन्यच्च समीनो मत्स्यः अज्ञाना
२ त् बडिशायुतं पिशितं मांसम् अश्नाति भक्षयति इह अस्मिन् संसारे एते वयं विज्ञानेनापि का
9

अज्ञानमाहात्म्यं पततु शलभः तीव्रदहने समीनोप्यज्ञा
नाद्बडिशायुतमश्नाति पिशितं विजानन्तोऽप्येते वयमिह विपज्जा
लजटिलान्न मुञ्चामः कामान् अहह गहनो मोहमहिमा २२

मानमुञ्चामः किं विशिष्टान् कामान् विपज्जालजटिलान् विपदां जालः विपज्जालः तेन मू
जटिलाः विपज्जालजटिलाः तान् विपज्जालजटिलान् अतः एव मोहमहिमा गहनो गरीयान् २

अथ दुर्जनमहिषणाह व्याख्या व येदुर्जनानां पिशुनानाम अविनयमनुमंतेयं अंगीकर्त्तुं नोत्सहे
नी०२ नोत्साहे कुर्म्मोहे किं विशिष्टानां दुर्जनानां नवधनमधुपानभ्रांतसर्वेंद्रियाणां नवनवीनोपा
पार्जितं धनं नवधनं तदेव मधुपानं मदिरापानं तेन मधुपानेन भ्रांतानि सर्वाणि इंद्रियाणि

विशमलमशनाय स्वादुपानाय तोयं शयनमवनिपृष्ठे वल्कले वाससे च ।
नवधनमधुपानभ्रांतसर्वेंद्रियाणाम अविनयमनुमंतुं नोत्सहे दुर्जनानाम ॥ ११

येषां तेन नवधनमधुपानभ्रांतसर्वेंद्रियास्तेषां अलमत्यर्थं अशनाय भोजनाय वि
शाकमलिनीकेटं वरं चान्यत् स्वादुपानाय तोयं वरं चान्यत् अवनिपृष्ठे शयने वरं व
ल्कले वाससे वल्कलचीरे वरं २२ ॥

वै॰ टी॰ १ अयमानिनाम् द्विशाह पुंसां पुरुषाणां क एष मदज्वरः कुत्सितकतिपयपुरस्वाम्ये स-
तियत्नैः कैश्चित्पुरा पूर्वं जगज्जनितं जगत्स्रष्टृभिः किं विशिष्टैः धन्यैः विपुलहृदयैः ब्रह्मदेवेना-
भिः अपरैः कैश्चिद्दापि विधृतं निजभुजाभ्यां धारितम् अन्यैः कैश्चिद्दापि पुरुषैः चान्यद्दत्तं

विपुलहृदयैरीशैः कैश्चिज्जगज्जनितं पुरा विधृतमपरैर्दत्तं चान्यैर्विजित्य तृणं यथा
इह हि भुवनान्यन्ये धीराश्चतुर्दश भुञ्जते कतिपयपुरस्वाम्ये पुंसां क एष मदज्वरः
२८

किं कृत्वा विजित्य यथा शब्दोऽत्रार्थे वर्तते जगत्कमिव यथा तृणमनायासेन दीयते
तथा जगद्धि जित्य दत्तं हि निश्चितम् अस्मिन् लोके अन्ये धीराः चतुर्दश भुवनानि
भुञ्जते तदा स्वल्पस्वाम्ये कोऽयं गर्वः २८

अथ निःस्पृहाणामधिकारमाह देवेति हे देव त्वं राजा वर्त्तसे वयमपि उपासितगुरुप्रज्ञाभिमा-
नोन्नताः वर्त्तामहे हे राजेंद्र त्वं विभवैः ख्यातः नोऽस्माकं यशांसि महत्वादीनि कवयः कवी-
श्वराः दिक्षु प्रतन्वंति दिशासु विस्तारयंति हे मानद मानं ददातीति मानदः वादोऽत्र वर्त्ते

त्वं राजा वयमप्युपासितगुरुप्रज्ञाभिमानोन्नताः ख्यातस्त्वं विभवैर्यशांसि कव-
यो दिक्षु प्रतन्वंति नः इत्थं मानद नातिदूरमुभयोरप्यावयोरंतरं यद्यस्मासु प-
राङ्मुखो वयमप्येकांततो निस्पृहाः २५

नन्वेवं भवतां ज्ञानानामाकारस्य विकरणोदोनं इदं हे मानद मानखंडन आवयोरुभयोर-
पि अंतरं नातिदूरं हे राजेंद्र यदि चेत् त्वं अस्मासु पराङ्मुखोऽसि अनादरोऽसि तदा वय-
मप्येकांततो निस्पृहा वर्त्तामहे धनादराः तवापि विषये अनादराः २५ ॥

त्व

वै॰ टी॰ ॥

अथ परमाणोर्गर्वनिरस्कारो हि रूपादि जन्यः स्पर्शः विषादेकर्तव्ये अनन्तत्वसम्बन्धस्त्वेवमदं विद
धति कथं हि निभज्जो राज्ञो यस्याः भवः पृथिव्याः लाभेकरखववद्भूमानः यस्याः पृथिव्याः

अभक्ष्याया यस्यां तृणमपि न याति तं न पश्यति भवस्तस्यां लाभेकरखववद्भूमा
नः हि निभज्जो नदस्याथ्यशोनदवयवलेशोपि पतयो विषादेकर्तव्ये विद
धति जन्यः प्रत्युत्तमहम् २६

अभक्ष्यायां तस्यां न पश्यति नरेंद्र महदैवः तृणमपि न याति तं न गतं किं विजयः तदंशस्याशो
नस्याः पृथिव्याः विभागस्यापि विभागेन न तदवयवलेशेन तस्य अंशस्यापि लेशोपि पयनयः स्या

अथ पुनराह नानाप्रकषाधमान्न यिकृये अथ नानेभ्योपि धनकणांबांछेति कथम यं।
मन्त्रिः॥ हस्तीवलयः अयं सर्वोपि जलरेखयावलयितः सन्ननु अणुः स्वल्प प्रमा
णः पुनः सएव मन्त्रिः राज्ञां गतोर्भज्यते किं कृत्वा संपूगशातैः संयामोगणश।

मन्त्रिडोजलरेखयावलयितः सर्वोप्ययं नलवणः स्वल्पीकृतस्सएव संपु
गशातैराज्ञां गतोर्भज्यते नेदमुद्दनेषवानकिमपि ह्लुद्दारिद्र्यः।
भगवि कुपिकृनान प्रकृषाधमानधनकणांबांछेतितेभ्योपिये १२

नैः अयं शीकृत्यते दृष्टाराज्ञानः भगवान्सर्वं किमपि दद्युः अथवानददनेतानेव पु
कृषाधमनान्यिकुपिकृये तेभ्योपिवांछांकुर्वंति १२ ॥ ५ ॥ राम ॥ ॥

केवयं

आख्या नामइति संबंधस्तेन्दुपमस्य निवर्यौ नराः नरूत्पातः नविराः उत्तीर्णा ननगायनाः नप
रद्रोहनिवद्धबुद्धयः एपरद्रोहे निवद्धाः बुद्धयो येषां ते परद्रोहनिवद्धबुद्धयः वयं योषितोपि
नकिंविशिष्टाः योषितः कुचभारानमिताः कुचभारेण आसमंतान्नावनननमिताः कुचभार।

ननरा न विराः नगायनाः नपरद्रोहनिवद्धबुद्धयः तुपमस्य निनामके वयं कुचभारान
मिता न योषितः २८ पुरा विद्वतासीदुपशमवतां क्लेशहतये गता कालेनासौ विषय
सुखसिद्धौ विषयिणां इदानीं संप्रेक्ष्य क्षितितलभुजः शास्त्रविमुखान् अहो कष्टं
सापि प्रतिदिनमधोधः प्रविशति २९

नमिताः एवंविधापि २८ पुनराह पुरा पूर्वमुपशमवतां विद्वता वैदुष्यत्वं क्लेशहतये सं
सारनिवारणाय आसीत् असौ विद्वता कालेन गच्छता विषयिणां पुरुषाणां विषय
सुखसिद्धौ गता अहो इति खेदे कष्टं विलोकनात् इदानीं सापि विद्वता प्रतिदिनं अहरहः
प्रतिअधोधः प्रविशति किंकृत्वा शास्त्रविमुखान् क्षितितलभुजः प्रेक्ष्य निरीक्ष्य॥२९

माहंकारपुरुषोदिशाहि कोऽपि पुरुषः आसीत् यस्य पुरुषस्य कपालमद्वैर्यया
भवति मदनरिपुणो महेशस्य मूर्ध्नि मलके अलंकारविधये विनिहिते किंविशिष्टे
कपाले धवलमज्जले अधुनाऽद्यानीकेश्चिन्नमद्भिः नृभिः पुंसां पुरुषाणां को

मज्जानः कोऽप्यासीन्मदनरिपुणो मूर्ध्नि धवले कपाले यस्योच्चैर्विनिहित
९२ मलंकारविधये नृभिः प्रांशुप्राणप्रणमतिभिः कैश्चिदधुनानमद्भिः कः पुं
सामयमनलदर्पोज्वरभरः २०

यमनलदर्पोज्वरभरः किंविशिष्टैः नृभिः प्राणप्राणप्रणामतिभिः प्राणस्य प्राण
प्राणेप्राणप्राणेप्राणैः प्रणमतिर्येषां ते प्राणप्राणप्रणामतयस्तैः २० ॥

प्राणे

13

पुनस्तदेवाह हे राजन् त्वमर्थानामीशिषे समर्थो भवसि चान्यत् वयमपि गिरां वाणीनामीश्म
हे समर्थाः भवामः चान्यत् त्वं यावद्दिस्यश्च मनामयकारेण शूरः नोऽस्माकं वाग्मिदर्पज्वरमनुवि
धौश्चत्त्वं नित्यं लंपाटवं वर्त्तते हे राजन् त्वां धनार्थाः सेवंते मामपि श्रोतुकामाः श्रोतारः

अर्थानामीशिषे त्वं वयमपि च गिरामीश्महे समर्थाः भवामः चान्यत्त्वं यावद्दित्वं
शूरस्त्वं वाग्मिदर्पज्वरमनुविधावत्तयेपाटवं नः सेवंते त्वां धनार्थाः मतिमल
हतये मामपि श्रोतुकामाः मामप्यास्थानमेतत्त्वयि मम सुतरामेष राजन् ग
तोऽसि ॥२॥

सेवंते किमर्थं मतिमलहतये बुद्धिकालुष्यस्फोटनाय हे राजन् ममापि त्वयि विषये ए
तदास्थानेएषः त्वं सुतरामतिशयेन मां प्रति गतोऽसि अस्मामोऽसि एतावता नावममकिमर्थं

आत्मनोगुणगणवर्णनमाह अहंयदायस्मिन्समयेमहाबोधः समभवं किंविशिष्टः
अहं किंचिज्ज्ञः किंचिन्ज्ञानानीतिकिंचिज्ज्ञः यत्तदोर्नित्यसंबंधः तदाममनः इति
अवलिप्तमभवत् इतीति किं अहं सर्वज्ञोस्मि यदायस्मिन्समये बुधजनसका

यदाकिंचिज्ज्ञोहं द्विपइवमदांधः समभवं तदासर्वज्ञोस्मीत्यभवदवलिप्तंमम
ममनः यदाकिंचित्तं बुधजनसकाशादवगतं तदामूर्खोस्मीतिज्वरइवम
दोमेव्यपगतः ३२

शात् पंडितवर्गसमीपात् किंचित् २ अवगतं ज्ञातं तदा इति अमुनाप्रकारेण
म३ मेमम मदो व्यपगतो दूरीभूतः इतीति किं अहं मूर्खोस्मि मदः कस्य ज्वर इव यथाक
स्यापि ज्वरो याति तथा मे मम अहंकारो यातः ३२ ॥ ॥

वै॰ श॰ १८

१५

अथनिर्ममतास्वरूपमाह हे बाले लटभललनाभोगसुभगः कालो ऽतिक्रांतः अतिच
क्रामः लटभाः सलावण्या या ललनास्तासां भोगमनोज्ञः लटभललनाभोगः इहस्य
स्मिन्संसारे मर्त्यलोके संसारे मरणे भ्रमंतः श्रांताः स्मः इदानीं स्वःसिंधोः गंगायाः तटभु

टभलल

अतिक्रांतः कालो ललनाभोगसुभगो भ्रमंतः श्रांताः स्मः सुचिरमिह संसारस
रणौ इदानीं स्वःसिंधोः तटभुवि समाक्रंदनगिरः सुतारैः फूत्कारैः शिव
शिव शिवेति प्रतनुतः २२

विकल्पस्थलीषु शिवशिव शिवेति प्रतनुमः किंविशिष्टाः वयं फूत्कारैः सुतारैः स
माक्रंदनगिरः रे बाले त्वं कासितव सन्मुखेन विलोकयामः २२ ॥ १८

अन्यदाह ऋषिर्योगुरुबाणांकेवलमेनदेवपुंसंयतज्जह्नुकंन्यापयःस्तनयावगिरीन्द्रकंद
रदरीकुंजेककवितनिवासःकोर्थः जह्नुकन्यापयाःगंगायाःपयसाहृताःपवित्राश्चयाव्राः
नेषांयामोगिरींद्रः पर्वतःतस्यकंदरस्यविवरस्यदरीगुफातस्यानिकुंजःजह्नुक

मानेत्वापिनिरवंडितेचवसतिनिमग्नर्घेस्थानेयिनितीर्णधुजनेगतेपरित्र
नेनहेशनैर्यौवने पुंसंकेवलमेनदेवसृधियायज्जह्नुकन्यापयः स्तनयावगि
रीन्द्रकंदरदरीकुंजेनिवासःक्वचित ३४

न्यापयाःस्तनयावगिरीन्द्रकंदरदरीकुंजःतस्मिन् तत्रनिवासोवरेकस्मिन्मानेत्वा
पिनिसतिचान्यत्वसतिनिरवंडितेसतिचानदर्पिनियाचकेत्यर्थेस्थानेसतिचा
न्यतत्तीर्णेवधुजनेसतिचान्यत्परिजनेगतेसतिचान्यतशनैःयौवनेनष्टेसतिन

वै. २५ 15

अन्यदाह हा इति खेदे त्वं हे हृदय बहुधा प्रसादं किं न नेतुमर्हसि न विप्रामि किं भूतं परे-
षां मपरेषां चेतांसि प्रतिदिवसं दिवसं प्रति आराध्य किं विशिष्टं प्रसादं क्लेशकलि-

परेषां चेतांसि प्रतिदिवसमाराध्य बहुधा प्रसादं किं नेतुं विशसि हृदय
क्लेशकलिलं प्रसन्ने त्वय्यन्तः स्वयमुदितचिन्तामणिगणे विविक्तः सं-
कल्पः किमभिलषितं पुष्यति न ते २५

लोकस्य मलिनं हे हृदय त्वयि अन्तर्मध्ये प्रसन्ने सति अभिलषितं वाञ्छितं तेन न पुष्य-
ति किं विशिष्टे त्वयि स्वयमुदितचिन्तामणिगणे किं विशिष्टः त्वं विविक्तसंकल्पः २५ १५

अथ यान्यदाह सको लोको व्रजति अस्माभिः तत्तगणितं किंविशिष्टः कालः अनावर्ती अपुन
रागामी न पुनः आगमोस्यास्तीति असावपुनरागामी तदस्यास्तीति यत्त्वतयः अस्माभिस्ता
स्ताः दशाः सोढाः तत्किं पश्चादाचक्ष्मामः किंविशिष्टाः दशाः व्यसनशतसंपातविधुराः

अनावर्ती कालो व्रजति स वृथा तत्र गणितं दशास्तास्ताः सोढा व्यसनशत
संपातविधुराः किं पश्चादाचक्ष्मामः किमिव वचनानां न्यपहृतं वयो यावत्ताव
न्नरपतिरेव व्यवसिते २६

व्यसनानां कष्टानां शतैर्व्यसनशतैः तस्य संपातेन विधुराः व्यसनशतसंपातविधुराः व
न इति खेदे अस्माभिः आत्मनि किमिव न अपकृतं विचारणं कृतं यावद्धृदयेन ताव
न्नरपतिदेव व्यवसितं उद्यमितं येन कर्मणा कुः खितैर्भ्रयते ः २६ ॥

पुनरप्यभिमानिनामाह कोभिमानी पुमान्धनलवमदांधं प्रणमति किं कृत्वा त्रिनेत्रं महे
शानं ज्ञात्वा तदाह इति कथमित्याह प्राणान्यापयितुं महारामसरितः भूः इहश्रीफलैः संपूर्णा च
विपुनः विटपिमृगचर्मैव वसनं विटपिमृगजन्तुकृत्स्नगचर्मणीव वस्त्रं सुखेवाइः खेवासहशप
रिपाकः सहकुकर्मणः फलं खलु निश्चित्तेन तदा धनलवमदांधकः प्रणमति २७ अथान्यद

नमित्वाइः प्राणापयिपयिमहारामसरितः फलैः संपूर्णा भूः विटपिमृगचर्मापि व
सनं सुखेवाइः खवासहशपरिपाकः खलु नरा त्रिनेत्रं कस्यान्काधनलवमदां
धं प्रणमति २७ स्थितिः पुण्यारण्ये सह परिचयो हन्त हरिणैः फलैः मेध्यावृत्तिः
प्रतिनदि च तल्पानि दृषदः इतीयं सामग्री भवति हरिभक्तिस्पृहयतां वने वा गेहे वा सह

दृश उपशान्तैकमनसामुपशान्तमेकं मनो येषां ते उपशान्तैकमनसः तेषां यतीनां वने वा गे
हे वा सदृश इति अमुना प्रकारेण इयं सामग्री हरिभक्तिस्पृहयतां भवति इतीति किं पुण्यप
वित्रे अरण्ये स्थितिः पुनः इतीति किं हन्त इत्यागमे हरिणैः सह परिचयः चान्यत् फलैः मेध्यावृ
त्तिः नित्यं चान्यत् प्रतिनदि नदीं २ प्रति दृषदः तल्पानि २८ रामरामराम ॥ः

अथ्यानमदाह अस्माभिरमीषां प्राणानां किंभूतानां प्राणानां तुलितबिशिनीपत्रपय।
सां तुलितं बिशिनीपत्राणां कमलिनीदलानां पयो यैस्ते तेषां कृते किं न व्यवसितम
घमितं किं विशिष्टैः अस्माभिः विगलितविवेकैः विगलितो विवेको येषां ते विगलि
तविवेकास्तैः विवेकरहितैरित्यर्थः यत् आध्यानामग्रे धनवतां पुरः वीतव्रीडैः ग।

अमीषां प्राणानां तुलितबिशिनीपत्रपयसां कृते किं नास्माभिर्विगलि
तविवेकैर्व्यवसितं यदाढ्यानामग्रे द्रविणमदनिःसंज्ञमनसां कृते वीत
व्रीडैर्निजगुणकथापातकमपि २९

तलज्जैरस्माभिः निजगुणकथापातकमपि कृतं निजगुणानां कथा निजगुणकथा ते
षां पातकं निजगुणकथापातकं किं विशिष्टानामाढ्यानां द्रविणमदनिःसंज्ञमन
सां कोऽर्थः द्रविणमदेन धनमदेन निःसंज्ञमनो येषां ते द्रविणमदनिःसंज्ञमनसस्तेषां
धनमदव्यचेतनानां इत्यर्थः २९

वै॰ १८

17

यथान्यदाह तस्मैकालायनमः अहो इति आश्चर्ये हे भ्रातः कृष्णं त्रिलोकानां किंकरं स ए
व महान् नृपतिः चान्यत् तत्सामंतचक्रं चान्यत् तत्सपार्श्वं सापि राज्ञपरिषत् सापि
राजसभा चान्यत् तास्वंहु विंवाननाः नार्यः चान्यत् राजपुत्रनिवहः नपक्वमारस

भ्रातः कृष्णमहो महान् स नृपतिः सामंतचक्रं च तत् पार्श्वं तस्य च सापि राज
परिषत् तास्वंहु विंवाननाः उद्रिक्तः स च राजपुत्रनिवहस्ते वंदिनस्ताः कथा
सर्वं यस्य वशादगात् स्मृतिपदं कालाय तस्मै नमः ५० ॥ राम

स्यहः किंविशिष्टः राजपुत्रनिवहः उद्रिक्तः सदर्पः चान्यत् ते वंदिनः तेभ हाः
चान्यत् ताः कथाः यस्य वशात् एतत्सर्वं एवं अमी स्मृतिपदमगात् कथाशेषं ज
गाम कालाय तस्मैनमो यतः कालेन लीयते सर्वं ५० ॥ ॥

पुनः कालो दिशति वयं येभ्यो स्मानवयोभ्यः संजाताः खलु निश्चितं ते चिरपरिगताः।
व वयं यैः समं संवृद्धास्तेऽपि स्मृतिविषयतां गमिताः स्मृतेर्विषयतां स्मृति विषयतां नाः
स्मारिताः स्मृतेः चेतोगोचरमायातीत्यर्थः इदानीमेते वयं स्मः सावशेषाः किंविशिष्टाः
वयं सिकितिलनदीतीरतरुभिस्तुल्यावस्थां गताः सिकतिलावालुकान्विता नदी सि

वयं येभ्यो जाताश्चिरपरिगता एव खलु ते समं यैः संवृद्धाः स्मृतिविषयतां ते
ऽपि गमिताः इदानीमेते स्मः प्रतिदिवसमासन्नपतना गतास्तुल्यावस्थां सिक
तिलनदीतीरतरुभिः ४१

कतिलनदी तस्यास्तीरतरवः सिकतिलनदीतीरतरवस्तैः एतां(वता) सिकतिलतीरतरवः
पतनशीला भवन्तीत्यर्थः सकुमारभ्य मित्वात् यादृशास्तेतरवः तादृक् अवस्थां वयं
प्राप्ताः स्मः कस्मात्प्रतिदिवसं दिवसं दिवसं प्रत्यासन्नपतनात् आसन्नकालमरणात् एतावता

अथान्यदाह कालः सम्भुः कालया सह कालरात्र्या सह मालिनीसारैः सनत्कामुपक्षैः क्रीड
ति स मति किं विशिष्टः कालः बहुकलः बह्वीकला यस्य सो बहुकलः किं कुर्वन् इमौ द्वौ
रजनिदिवसौ इयमस्य नाम प्रकारेण अत्यन्ताविव पाशकाविव दोलयन् प्रक्षिपन् प्रेरयन्

यथाऽनेकः कश्चिद्दाम्पिगृहे तत्र तिष्ठमध्ये कोऽप्यथाप्येकस्तदत्र बहुवल्लवगो नेनैवैकः
इत्थं चेमौ रजनिदिवसौ दोलयन् हाविवाद्यौ कालः कालेन सह बहुकलः क्रीडति
मालिनीसारैः ५१

शृङ्गोपमर्थः अन्योऽपि यो द्यूतमत्तः क्रीडां कुरुते तस्मात्सोऽपाशकौ विलोक्य अत्र काल
द्यूतः रजनिदिवसावेव पाशकौ इत्यंकथ्येय चन्द्रचिद्दाम्पिगृहे अनेकः तत्र एकलिङ्ग
ति अपि पुनः यत्र एकस्तदनु पश्चात्तत्र बहवः वा न तत्र एकोऽपि न कालक्रीडायाः
इत्थंभावनः ५२

सा

अथान्यदाह जने लोके न विद्मः किं कुर्मः किमिति संशये सरनंदीं गंगां निवसामः
अश्रमं कुर्मः किं विशिष्टाः वयं तपस्यतः तपः कुर्वतः सतः उत अथवा दारान् कल
त्रान् परिचरामः परिचर्यां कुर्मः किं विशिष्टान् दारान् गुणोपेतान् दारान् गुणोत्कटान्

तपस्यंतः संतः किमधि निवसामः सरनंदीं गुणोत्कटान् दारानुत परिचरामः
सवितर्यं पिबामः शास्त्रोद्यानद्रुत विविधकाव्यामृतरसान् न विद्मः किं कु
र्मः कतिपयनिमेषायुषि जने ४३

उत अथवा शास्त्रोद्यान् पिबामः स्मरामः किं विशिष्टान् शास्त्रोद्यान् द्रुत विविधका
व्यामृतरसान् द्रुतः स्रुतः विविधकाव्यानाममृतरसो येषु ते द्रुत विविधकाव्यामृता
साः तान् चैतस्मास्माकं तेषायोव विवर्तिपतेषु पदार्थेषु किं कुर्मः यो गुणाधिकं त्वमे

वैरा॰ ४३

वै॰श॰ २८
19

अथ्यात्मवाह किमिति संभावनायां मम तैः सुदिवसैर्भाव्यं यत्र जरठहरिणाः प्रौढमृगाः
निर्विशंकाः संतः निर्गताः विशेषेण शंका येभ्यो ते शृंगकंडूविनोदं विषाणकंडूषणली
लां संप्राप्स्यंते किं विशिष्टस्य मम हिमगिरिशिलाबद्धपद्मासनस्य हिमगिरिशिलायां ब
द्धं पद्मासनं येन सः हिमगिरिशिलाबद्धपद्मासनः तस्य हिमवद्गंगातीरे पुनः किं म

गंगातीरे हिमगिरिशिलाबद्धपद्मासनस्य ब्रह्मध्यानाभ्यसनविधिना योगनि
द्रां गतस्य किं तैर्भाव्यं मम सुदिवसैर्यत्र ते निर्विशंकाः संप्राप्स्यंते जरठहरि-
णाः शृंगकंडूविनोदं ४४

म योगनिद्रां गतस्य योगनिद्रायां प्राप्तः योगनिद्रां प्राप्तः तस्य केन ब्रह्मध्यानाभ्य
सनविधिना ब्रह्मध्यानस्याभ्यसनं ब्रह्मध्यानाभ्यसनं तस्य यो विधिः ब्रह्मध्याना-
भ्यसनविधिः तेन एवंविधेन निर्मलभावेन स्वस्वमाध्यासिद्धिः ४४ ॥ रामः

अन्यदाह् वयं शिवशिवेत्यार्त्तवचसाकरास्याम किंविशिष्टाः वयं भवाभोगोद्विग्नाः
भवस्य संसारस्य आभोगः तेन उद्विग्नाः शिवशिवशिवेत्यार्त्तवचसा आनंदोद्भूतव
द्धलवाष्पस्नुतदृशाः आनंदेनोद्भूतानि बहुलानि यानि वाष्पाणि तैः स्नुते दृशौ ये

स्फुरत्स्फारज्योत्स्नाधवलिततले क्वापि पुलिने सुखासीनाः शांतध्वनिषु र
जनीषु द्युसरितः भवाभोगोद्विग्नाः शिव शिव शिवेत्यार्त्तवचसाकरास्यामा
हर्षोद्भूतबहुलबाष्पलुतदृशः ४५

षां ते आनंदोद्भूतबहुलवाष्पस्नुतदृशः पुनः किं वयं द्युसरितः गंगायाः क्वापि
निर्जने पुलिने सुखासीनाः कासु रजनीषु किं रजनीषु शांतध्वनिषु उप
शांतशब्दासु एवंविधाः वयं स्याम संभोगहीनानामेवपुः ४५ ॥

वै॰ टी॰ २०

अथान्यदाह देवोमहादेवोमान्यः सरिदपिनद्यपिसैवअमरसरित्सुरनदी आगारंगृहंगु
हाएवैवमनमपिवस्त्रमपिहरितःदिशःवाअथवासुहृत्मित्रंअयंकालः व्रतंइदमदैन्यव्रत
मिदंकियत्वक्ष्यामः दयितावलंत्वेववटविटपएवअस्तु ४६ अथान्यदाह शार्वमहेशशि

महादेवोदेवः सरिदपिचसैवामरसरित् गुहाएवागारंवसनमपिताएवहरितः
सुहृद्वाकालोयंव्रतमिदमदैन्यव्रतमिदं कियद्वावक्ष्यामोवटविटपएवास्तुद
यिता ४६ शिरः शार्वंस्वर्गात्पशुपतिशिरस्तःक्षितिधरं गिरीन्द्रादुत्तुङ्गादव
निमवनेश्चापिजलधिं अधोधोगंगेयंपदमुपगतास्तोकमथवा विवेकभ्र
ष्टानांभवतिविनिपातःशतमुखः ४७

रः स्वर्गादधः पशुपतिशिरस्तः महेश्वरमस्तकात् क्षितिधरः उत्तुंगात् गिरीन्द्रा
त् अवनिं अधोजानीहि अवनेश्चापिजलधिं समुद्रमधोजानीहि स्तोकंगंगेयमधोधः
उपगता अथवा विवेकभ्रष्टानां प्राणिनां विनिपातः शतंमुखानियस्यसः शतमुखो

श्रीराम २०

अथ यान्स्याह नाम इति संबोधने आशानदी किं आशानदी मनोरथजला मनोरथा एव जला
नि यस्यां सा पुनः किं विशिष्टाः आशा नदी तृस्नातरंगाकुला अन्यापि या नदी भवति सा तरं
गाकुला भवति इयं नदी तृस्नातरंगाकुला पुनः किं आशानदी रागग्राहयुक्ता युक्ते अन्या
पि नदी जलचरजीववती भवति पुनरपि किं आशानदी मोहावर्त्तसुदुस्तरा मोहस्य ।

आशा नाम नदी मनोरथजला तृस्नातरंगाकुला रागग्राहवती वितर्कविहगा धै
र्यद्रुमध्वंसिनी मोहावर्त्तसुदुस्तरातिगहना प्रोत्तुंगचिंतानदी तस्याः पारंगता विशु ॥१२
द्धमनसो नंदंतु योगीश्वराः ४८

आवर्तः तेन सुदुस्तरा मोहावर्तसुदुस्तरा अन्यापि नदी सुदुस्तरा भवति पुनः किं आशा
नदी अतिगहना अतीव गहने यस्याः सा अतिगहना अन्यापि नदी गातिगहना पुनः
किं आशानदी प्रोत्तुंगचिंतानदी प्रोत्तुंगा चिंता एव तटी यस्याः सा अन्यापि नदी तटि
नी प्रोच्यते तस्याः नद्याः पारंगताः योगीश्वराः नंदंतु सर्वोत्कर्षेण वर्त्तंते किं विशि

२४

वै.श.
२२

अथान्यदाह। ईतावता तादृक् कोऽपि पुमान् अस्माकं नयनपदवीं नेत्रगोचरं वा श्रवा श्रोत्रवर्त्म
श्रवणमात्रेण गतः। यः अयं धत्तेव स्यान्तःकरणकरिणः संयमालानलीलां किंवि-
षः। अयं विषयकरिणीगाढरूढाभिमानः विषयएवकरिणीहस्तिनी तस्यां गाढ-

आसंसारं त्रिभुवनमिदं चिन्वतां तात तादृक् नैवास्माकं नयनपदवीं श्रोत्रवर्त्म
गतो वा योऽयं धत्ते विषयकरिणीगाढरूढाभिमानः जीवस्यान्तःकरणकरि-
णः संयमालानलीला ४५

रूढो अभिमानो यस्य सः। किंलक्षणानामस्माकं आसंसारं यावत् इदं त्रिभुवनं चि-
न्वतां संचयतां वह्णयतां योजितेंद्रियः सविरलः ४६

२१

अथ अन्यदाह अहं तेषां ग्रामराणां अंतःस्फुरति हसिते ध्यानळेहे स्मेरेयं चिंतयामि ये वाम
गः धनपतिपुरे धनाशा नाम पुरस्तात् अर्थनाडः खदीर्घः वर्तते मार्थनाडः खेवदीर्घः आ
र्थनाडः खदीर्घा चात्यत येषां मराः विषयाक्षेपपर्यस्तबुद्धेः प्राणिनः अज्ञत्वे अज्ञानत्वे

येवर्ते ते धनवृत्तिपुरः मार्धनाडः खभाजो ये चाज्ञत्वं दधति विषयाक्षेपपर्यस्त
स्तबुद्धेः तेषामंतः स्फुरत हसितं वा स्मराणां स्मेरेयं ध्यानळेहे शिखरिकुहरग्रा
वण्यानि षण्मः ५०

दधति विषयस्य आक्षेपः आदरः विषयाक्षेपः विषयाक्षेपेण विषयादरेण पर्यस्तानि
राकुलानि बुद्धिर्येषां ते विषयाक्षेपपर्यस्तबुद्धिः तस्य विषयाक्षेपपर्यस्तबुद्धेः किंविशि
ष्टः अहं शिखरिकुहरग्रावण्यानि षण्मः शिखरिणः कुहरं शिखरिकुहरस्य पर्व शिखरिकुहरः २
तविवरस्य ग्रावण्याया निषण्णः निविष्टः ५० ॥ राम ५० राम ५०॥

72

सांप्रतं निर्वेदनायाः स च प्रमाह अहो अयं कालः अस्माभिः पिंडलोलुपतया काकैरिव प्रे
रितः परपिंडस्य परग्रासस्य लोलुपता परपिंडलोलुपता तया कथं अस्माभिर्विद्या नाधि
गता न पठिता किं विशिष्टा विद्या कलंकरहिता दोषरहितानि तेषामित्यर्थः चान्यत् वि
त्तेनोपार्जितं अपि पुनः समाहितेन मनसा निश्चलचित्तेन पित्रोर्माताजनकयोः शु॰

विद्यानाधिगताकलंकरहितावित्तंचनोपार्जितंशुश्रूषापिसमाहितेनमनसा
पित्रोर्नसंपादिताः आलोलायतलोचनायुवतयःस्वप्नेपिनालिंगिताः कालो॰
यंपरपिंडलोलुपतयाकाकैरिवप्रेरितः ॥१॥

शुश्रूषयेन संपादिता न च हिता चान्यत् स्वप्नेपि युवतयो नालिंगिताः किं युवतयः आलो
लायतलोचनाः आसमंताद्भावेन लोलानि चपलानि आयतानि दीर्घाणि लोचनानि
यासां ताः आलोलायतलोचनाः तस्मात्कारणान्मधैव जन्म गतासितं ॥१॥ ॥

अन्वयस्तु वयं पुनः पवित्रे अरण्ये कदाचित् त्रियामा नेष्यामः कैः समं परिणतशरच्चंद्र
किरणैः समं कोर्थः परिणताः परिणामं प्राप्ताः ये शरत्कालीनाः चंद्रकिरणाः प
रिणतशरच्चंद्रकिरणाः नेक्कसन्ति सन्ति सर्वस्वे सर्वधने वितीर्णे सति किं वपतः

वितीर्णे सर्वस्वे तरुणकरुणापूर्णहृदयाः स्मरंतः संसारे विगुणपरिण
मावधिगतीः वयं पुण्यारण्ये परिणतशरच्चंद्रकिरणैः त्रियामा नेष्यामो
हरचरणचिंतैकशरणाः ५२

कमर्ण १ णापूर्णहृदयाः तरुणकरुणया पूर्णं हृदयं येषां ते तरुणकरुणापूर्णहृदयाः वयं कथंभूताः
संसारे विगुणपरिणामावधियोगतयः विगुणपरिणामावधिगतयः ता पुनः कि
वं हरचरणचिंतनैः कशरणाः एवं चिन्तयं एवं शरणं येषां ते हरचरणचिंतैकशरणाः
॥ ५२

चर १ हरचण

वै· ११ अथान्यदाह हे राजेन्द्र अस्मिन्स्थले एव यथैव वल्कलैः परितुष्टः चानन्तत्वं लक्ष्म्या परि
तुष्टः एतावतांशेनोभयोरन्यत्वमेकमेव द्वयोरस्मिन्नर्थे परितोषः सम एव किंविशिष्टः प
93 रितोषः निर्विशेषः निर्विशेषं एवविशेषोऽनवकाशेन यस्य स निर्विशेषः अविशेषस्यापेक्ष
विशेषाः

वयमिह परितुष्टा वल्कलैस्त्वं च लक्ष्म्या सम इह परितोषो निर्विशेषो विशेषः
स तु भवतु दरिद्रो यस्य तृष्णा विशाला मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः
५३

पुनः स दरिद्रो भवतु यस्य पुरुषस्य विशाला विस्तीर्णा तृष्णा अनेन तस्य पुंसः दरि
द्रत्वापि नयतीत्यागमः तु पुनः मनसि परितुष्टे सति कोऽर्थवान् को दरिद्रः अपि तु न १३

अथात्मदाह् आत्मा परिणामोवर्तते एषाकापरिणतिः यदेतत्स्वाछंदविहरणं
अन्यच्च अकार्पण्यं अशनं स्वबलेभोजनं अन्यच्च सहार्यैः संवासः परिकरेण सह
निवासः परिकरेण सह निवासः उपशमैकव्रतं फलं उपशमः सोज्ञासितं श्रुतेषा

यदेतत्स्वाछंदं विहरणमकार्पण्यमशनं सहार्यैः संवासः श्रु
तमुपशमैकव्रतफलं मनोमंदस्पंदं बहिरपि चिरस्यापि वि
मृशन्न जाने कस्यैषा परिणतिरुदारस्य तपसः ५८ ॥ ॥

स्तं बहिरपि वाह्यप्रदेशेपि मनोमंदस्पंदं कल्पनारहितं अहं किं कुर्वन् चिरस्य
चिरकालाय विमृशन् विमर्शनीकुर्वन् चिरकालं विचिंतयन्नित्यर्थः ५८ ॥

वै अथान्यदाह धन्यास्त एव ये कर्म निर्मूलयंति किं धन्याः संन्याः संन्यस्तदैन्यव्यतिकराः सं
२५ न्यस्तो निराकृतः दैन्यव्यतिकरस्य निकरो यैः ते संन्यस्तदैन्यव्यतिकरनिकराः पुनः किं
२५ विशिष्टः ते स्वात्मसंतोषिणः स्वात्मनैव संतोषो येषां ते स्वात्मसंतोषिणः अन्यच्च येषां पु
रुषाणां निःसंगतांगीकरणपरिणतिः निःसंगताया अंगीकरणेन निःसंगतांगीकरणे

पाणिः पात्रं पवित्रं भ्रमणपरिगतं भैक्षमक्षय्यमन्नं विस्तीर्णं वस्त्रमाशादशकम
यमलं तल्पमस्वल्पमुर्वी येषां निःसंगतांगीकरणपरिणतिः स्वात्मसंतोषिण सं
स्ते धन्याः संन्यस्तदैन्यव्यतिकरनिकराः कर्म निर्मूलयंति ५५

नस्य परिणतिः निःसंगे येषां पुरुषाणां पात्रं भोजनभांडं पाणिः हस्तः पवित्रं भ्रमणपरि
गतं भैक्ष्यमक्षय्यं अन्नं वस्त्रं विस्तीर्णं आशादशकं अचपलं निर्मलं अस्वल्पं विस्ती
र्णं या उर्वी पृथ्वी एवं विधिस्वरूपेण ये संसारपारं गच्छंति त एव धन्याः ५५ २५

अथान्यदाह व्याख्या हेमखेजगतिरस्यायोविदुःखः पंडितस्यतपिसः अन्यत्रश्रे
यः कल्यानेनकथस्वामी अधिपतिः दुराराध्यः क्षितिभुजो राजानः तुरगचल

दुराराध्यः स्वामी तुरगचलचित्ताः क्षितिभुजो वयंतुस्थू
लेच्छा महति च पदे बद्धमनसः जरा देहं मृत्युर्हरति सक
लं जीवितमिदं सखे नान्यच्छ्रेयो जगति विदुषोऽन्यत्र तप
सः ५६

चित्ताः तुरंगमवत् चपलचेतसः नृपाः वयं स्थूलेच्छा चान्यत् महति पदे
किल बद्धमनसः जरा देहं हरति मृत्युरिदं सकलं जीवितं हरति नेत
स्पसा विनाश्रेयो न ५६ ॥

वै॰ टी॰ २५
25

अथान्यदाह हे बुधाः पंडिताः योगे मनोवचनकायसंरोधलक्षणे बुद्धिं विदध्वं इतर
दखिलेत्रणाणां वप्रायंकप्र भोगाः पंचागाः मेघवितानमध्यविलाससौदामिनीवच
लाः कोर्थः मेघवितानमध्ये विलसंती या सौदामिनी विद्युत् इव चंचलाः चान्यत आयु
र्जीवितं वायुविघट्टिताभ्रपटलीलीनांबुवत् भंगुरं वायुना विघट्टिता या अभ्रपटली

भोगा मेघवितानमध्यविलसत्सौदामनीचंचला आयुर्वायुविघट्टिताभ्रप
टलीलीनांबुवद्भंगुरं लोला यौवनलालनातनुभृतामित्याकलय्य द्रुतं
योगे धैर्यसमाधिसिद्धिसुलभे बुद्धिं विदध्वं बुधाः ५० ॥ ॥

तत्र लीनं यदंबु पानीयं तद्वद्भंगुरं विनाशशीलं वायुविघट्टिताभ्रपटलीलीनांबुवत्
भंगुरं तनुभृतां प्राणिनां यौवनलालनात् तारुण्यप्रतिपालनात् लोलं चंचलं वर्तते
इति आकलय्य इति विचिंत्य द्रुतं शीघ्रं योगे मनो विदध्वं ५० ॥ ॥ २५

अन्यथा आह मानी प्राणी अभिमानी पुमान् क्षुधार्तः स धन्यः स एव वरं पुनः तुल्यकुल्येषु
अनुदिनं दीनो न वरं तुल्यकुल्येषु भावः तुल्यकुल्याः तेषु पुनः प्राणी उदरदरीपूरणाय द्वा-
रं द्वारं प्रवृत्तो वरं किं कृत्वा महति ग्रामे वा अथवा वने कपालीकर्परं आदाय गृहीत्वा किं विशि-
ष्टां कपालीं सितपटच्छन्नपालीं सितपटेन श्वेतवस्त्रेण छन्ना आच्छादिता पाली यस्याः

पुण्ये ग्रामे वने वा महति सितपटच्छन्नपालीकपालीमादाय न्यायगर्भद्विजहुत
हुतभुक् धूमधूम्रोपकण्ठे । द्वारं द्वारं प्रवृत्तो वरमुदरदरीपूरणाय क्षुधार्तो मा-
नी प्राणी स धन्यो न पुनरनुदिनं तुल्यकुल्येषु दीनः ५८

सा सितपटच्छन्नपालीं तां किं विशिष्टे ग्रामे वने पुण्ये पवित्रे किं विशिष्टे न्यायगर्भद्वि-
जहुतहुतभुक् धूमधूम्रोपकण्ठे न्यायगर्भितेन द्विजेन हुतो यो सो हुतभुक् वैश्वान-
रः तस्य यो धूमः धूम्रोः धूम्रेण व्यामे उपकण्ठे यस्य तत् न्यायगर्भद्विजहुतभुक् धूम-

वै॰
सं॰
१९

28

अन्तरात् त एव योगिनो ये यत्प्रिमार्गे जैनैः एवं संभाष्यमाणाः न क्रुध्याः यास्यंति नैव त ए
मनसा यास्यंति किं वि॰ जैनैः इति अमनाप्रकारेण विकल्पमुखरैः इतीति किं अयं किं

चोग्गलः किमयं द्विजातिरथवा शूद्रो यत्किं तापसः किं वा तत्त्वनिवेशपेशा-
लमतिर्योगीश्वरः कोपि किं इत्युत्पन्नविकल्पजल्पमुखरैः संभाष्यमानो ज-
नैः न क्रुद्धा पथि नैव तुष्टमनसो यास्यंति ते योगिनः ५५ ॥

चोग्गलः वा अथवा द्विजो ब्राह्मणः अथवा शूद्रः अथवा किं तापसः वा अथवा योगीश्व-
रः किं वि॰ योगीश्वरः तत्त्वनिवेशपेशलमतिः तत्त्वनिवेशपेशले मनोज्ञा म-
तिर्यस्य असौ एवं विधानि विकल्पात्त एव धन्याः ५६ ॥ १९

अथान्यदाह हे सखे हे मित्र न एव केचित् धन्याः ये एवंप्रकारेण त्रिनयेनेति किंवि· धन्याः ते
सुकृतनिचयचितैकशरणाः सुकृतानां निचयः समूहः सुकृतनिचयः सुकृतनिचयचिते एकशरण
एषां ते सुकृतनिचयचितैकशरणाः पुनः किंविते त्रुटितभवबंधव्यतिकराः त्रुटितो भवबंध
स्य व्यतिकरो येषां ते त्रुटितभवबंधव्यतिकराः पुनः किंविते वनान्ते वनमध्ये चिन्तान्तर्विष

सखे धन्याः केचित् त्रुटितभवबंधव्यतिकराः वनान्ते चिन्तान्तर्विषमविषयाशी-
विषगताः शरच्चंद्रज्योत्स्नाधवलगगनाभोगसुभगा नयंते ये रात्रीः सुकृ
तनिचयचितैकशरणाः ६०

मविषयाशीविषगताः चिन्तान्तर्मान
समध्ये विषमो यो ऽसौ विषय एव आशीविषः दुष्टो विषोरगो गतो एषां ते चिन्तान्तर्विषय
विषयाशीविषगता वा विषमविषयाशीविगलिताः वा पाठः किंविशिष्टाः शरच्चंद्र
ज्योत्स्नाधवलगगनाभोगसुभगाः शरच्चंद्रज्योत्स्ना शरच्चंद्रज्योत्स्ना शरत्कालीनचंद्रम
सः कांत्या धवलेन गगनाभोगेन नभोविस्तारेण सुभगा मनोज्ञा या शरच्चंद्रज्योत्स्ना ध

वै॰ रो॰ १८ अथ यान्यदाह रेचेनः सोहं मार्जयन्तां रेस्रा गोन चेङ्गाई छ उ समणोरतिसंतो षेड पार्जयरेचेनः।
स्वगनरं गिणीनट भंजाआसंगसेगतिं अगी कुरु न असाकंवा यवाकोवी विषु कलो लेषुम
नयो विस्वासः चान्यत जलवुहुदेषु वर्षावारि स्यपुटेषु कः प्रत्ययः चान्यत नाउलेखा स्वसो

296

सोहं मार्जयतामन्यपार्जयरतिं चेङ्गाई छ उ समणो चेनः स्वर्गनरं गिणीनरभ
वामासेगमेगी कुरु कोवावी विषुवुहुदेषु चन उलेखा स चस्त्री षु वज्रा
ला अग्रेषु चपनागेषु चमरिहेगेषु कः प्रत्ययः ६३

दामिनीषु कः प्रत्ययः चस्त्रीषु कः प्रत्ययः चान्यत ज्वालाग्रेषु कः प्रत्ययः चान्यत पद्मग वै॰
षु कः प्रत्ययः चान्यत सरिद्वेगेषु कः प्रत्ययः तटनीप्रवाहेषु यघापतेषु स्थानकेषु नो। रो॰
असाके प्रत्ययोनास्ति न घाजीवनेषु जीवन लेषु कः प्रत्ययः को विस्वासः अपितन विस्वा २०

अथयान्यदाह रेचेतः यद्यप्येवमस्तितदाभवरसास्वादेनलेपटत्वंकुरु एवंकिंपटित्वाग्रे
स्रीतिंगतिंभवति अन्यच्चपार्श्विनोदाक्षिण्याः दक्षिणदेशीयाः स्मरसकवयो भवंति

अग्रेगीतेस्मरसकवयः पार्श्विनोदाक्षिण्याः दृष्टेलीलावलयर
णितेचामरग्राहिणीनां यद्यप्येवंकुरुभवरसास्वादेनलेपटत्व
नोचेच्चेतः प्रविशसहसानिर्विकल्पसमाधौ ६४ ॥

अन्यच्चदृष्टेचामरग्राहिणीनांसुंदरीणांवलयरणितंभवतियद्येवंविधंसौख्यंभवति ३४
तदासंसारस्यममताकुरुरेचेतः चेदेवंनतदासहसानिर्विकल्पसमाधौप्रविशप्रवेशंकुरु ५

वै॰ टी॰ २५

29

अर्थन्यदाह हेबुधा योषित्संगात्सुखात् विरमत विरतिं भजत किंवि॰ योषित्संगात्सुखात्॰
क्षणभंगुरात् करुणामैत्रीप्रज्ञावधूजनसंगमे कुरुतेत्यर्थः करुणा च मैत्री च प्रज्ञा च करु
णामैत्रीप्रज्ञा मेव वधूजनः तस्य संगमः करुणामैत्रीप्रज्ञावधूजनसंगमः तं करुणा

विरमत बुधाः योषित्संगात्सुखात्क्षणभंगुरात् भजत करुणामै
त्रीप्रज्ञावधूजनसंगमं नखलु नरके हाराक्रांतं घनं स्तनमंडलम्
शरणमथवा श्रोणीबिंबं रणन्मणिमेखलं ६४ ॥

मैत्रीप्रज्ञावधूजनसंगमे खलु निक्षिप्ते नरके घनं स्तनमंडलं अथवा श्रोणीबिंबं नितं
बबिंशरणं न किंवि॰ स्तनमंडलं हाराक्रांतं हारविभूषितं किंवि॰ श्रोणीबिंबं रणन्मणि
मेखलं रणंती शब्दायंती मणिमेखला यस्मिन् तत् रणन्मणिमेखलम् ६५ ॥

अथान्यदाह हे आत्मन् अनुपहतविधिश्रेयसां पुरुषाणां एषः पंथाः न उपहतं न निरा
कृतं अनुपहतेन विधिना मार्गेण श्रेयसां तेषां अनुपहतविधिश्रेयसं तेषां मुमुक्षूणां नामित्यर्थः
तेषामेष मार्गः एष वक्तव्य इति प्राणाघातान्निवृत्तिः जीवहिंसाविरमः परधनहरणे प
रद्रव्यापहारे संयमः यम उपरमे समसर्वः संयमनः संयमः परिहार इत्यर्थः पुनः किं सत्यवा

प्राणाघातान्निवृत्तिः परधनहरणे संयमः सत्यवाक्यं काले शक्त्या प्रदानं युवति
जनकथामूकभावः परेषां तृष्णास्रोतोविभंगो गुरुषु च विनयः सर्वभूतानु
कंपा सामान्या सर्वशास्त्रेष्वनुपहतविधिश्रेयसामेष पंथाः ६६

क्यं पुनः अपि किं काले शक्त्या प्रदानं पुनरपि किं परेषां युवतिजनकथामूकः भावः पुनरपि
किं तृष्णास्रोतोविभंगः लोभप्रवाहविच्छेदः च अन्यत् गुरुषु विनयः पुनः किं सर्वभूता
नुकंपा सर्वप्राणिदया किं विशिष्टा प्राणिदया सर्वशास्त्रेषु सामान्या समानस्य भावः सामा
न्यं सामान्या इत्यर्थः मोक्षमार्गेण एष मार्गः ६६ ॥

वै॰ टी॰ २॰ 30

अथास्मदाह हे मातः लक्ष्मि कंचिदपरं भज त्वं मत्कांक्षिणी मा स्मभूः मा भव यः वयं भोगेभ्यो
न स्पृहयालवः नेछवः अस्मिंन् निस्पृहाणां विरीहाणां का वयं भिक्षासक्तुभिरेव संप्र

मातर्लक्ष्मि भजस्व कंचिदपरं मत्कांक्षिणी मा स्मभूः भोगेभ्यः स्पृ
हयालवो न हि वयं का निस्पृहाणामसि सद्यः स्यूतपलासपत्रपु
टिकापात्रे पवित्रीकृते भिक्षासक्तुभिरेव संप्रति वयं वृत्तिं समीहा
महे ६०

ति इदानीं वृत्तिं दिनगमनिकां समीहामहे वांछामहे कसति सद्यः स्यूतकाले स्यूतपलास
पत्रपुटिकापात्रे पवित्रीकृते सति यदुत मस्माकं स्थितमदावयं त्वया किं कर्म ६० ॥

अथास्मदा हे मित्र आवयोरिति मतिरासीदियत्कालं इतीति किं पयं वयं पयं अधुना इदानीं
किं यातं येन पयंपयंपयंवयंवयं ६८ अथास्यदाह इयं बाला मां प्रति चक्षुर्नेत्रं अनवरते
निरंतरं किं क्षिपति किंवि नेत्रं इंदीवरदलप्रभाचौरं इंदीवरस्य कमलस्य दले इंदीवर

पयंवयंवयंपयमित्यासीन्मतिरावयोः किं यातमधुना येन पयंपयंवयंवयं
६८ इयं बाला मां प्रत्यनवरमिंदीवरदल प्रभाचौरं चक्षुः क्षिपति किमभिप्रेतं
५२ मनया गतो मोहो स्माकं स्मरकुसुमबाणव्यतिकरज्वरज्वालाशांतान्तदपिन
वराकी विरमति ६९

दलेन सप्रभाचौरयतीति इंदीवरदलप्रभाचौरं अनया किमभिप्रेतं किं वांछितं अस्मा
कं मोहो गतः स्मरकुसुमबाणव्यतिकरज्वरज्वालाशांतावराकी न दापि न विरमति ॥
६९

वै.टी.
२१
31

अस्मान्वदाह सैन्तः सम्भ्रमवशाः वनान्तं गताः किमिति संभावनायां नेघा वसन्तयेलिवासा यद्वस्मैन
दस्मेनाभूत अपि न अभून्न किमिति संभावनायां ग्वा घेवा अन्येश्रवणां हेगयादिकेगीता
दिनाभूत अपि न अभून्नवाघवा किमिति संभावनायां आगमसमासमागमसुखं प्राणानु
स्यायामियानस्याः समागमः सगः नस्पसुखं प्राणसमासमागमसुखं अयिकमीतयेअति

रमेहमेनलेनकिं वसनयेअयंनज्ञेयादिके किंवा प्राणसमासमागमसुखं नैवा
यिकमीतये किन्तु उज्ञानपतत्पतंगपवनव्यालोलदीपांकुरच्छायाचंचलमा
कलय्य सकलं सेनावनांतं गताः ७०

मस्त्रनायेनाभून्न अपि नैभून्न न यापि सेनोवनांतं गताः वने सेवयामासुः किन्तु उ
ज्ञानपतत्पतंगपवनव्यालोलदीपांकुरच्छायाचंचलन्तपुनः किमर्थं वने सेवयामा
सुः उज्ञानचक्षुः लोभेन भूमेमानः यामौ पतत्पतंगः तस्य पवनेन व्यालोल चंचला या दीपां
कुरस्य छाया कांतिस्तद्वच्चलं सकलं जीवलोकं विनश्वरं आकलय्य विविमहद्द्येन्ना

२१

अथान्यदाह यत्खलानां दुर्जनानां मुखानि वीक्ष्यन्ते विलोक्यन्ते यत्तदोर्नित्यसंबंधः त-
त्किं कंदरेभ्यः कंदाः प्रलयमुपगताः क्षयं जग्मुः वा अथवा गिरिभ्यः पर्वतेभ्यः निर्झराः प्रल-
यमुपगताः वा अथवा वल्कलिभ्यस्तरुभ्यः शाखाः प्रध्वस्ताः विनाशमुपजग्मुः किं वि·
शाखाः सरसफलभृतः सरसानि फलानि बिभ्रतीति सरसफलभृतः किं वि· फलानां

कं कंदाः कंदरेभ्यः प्रलयमुपगता निर्झरा वा गिरिभ्यः प्रध्वस्ता वा तरुभ्यः स-
रसफलभृतो वल्कलिभ्यश्च शाखाः वीक्ष्यन्ते यन्मुखानि प्रसभमपगतप्रश्र-
याणां खलानां दुःखोपात्ताल्पवित्तस्मयवशपवनानर्तितभ्रूलतानि ८।

प्रसभं यथा भवति उपगतप्रश्रयाणां प्रोल्लसत्गर्वीणां किं वि· मुखानि दुःखोपात्ता-
ल्पवित्तस्मयवशपवनर्तितभ्रूलतानि दुःखेन उपात्तं उपार्जितं यदल्पवित्तं तस्य स्म-
यवशपवनेन आसंताड्डावनर्तिता भ्रूलता यैः तानि दुःखोपात्ताल्पवित्तस्म-
यवशपवनानर्तितभ्रूलतानि ८।

वै॰ टी॰ ३२ अथ यान्यदाह मनुष्याः यत्रावमानपरपिण्डरताः वर्तन्ते तानि किं हिमवतः स्थानानि मलयं
गतानि किं वि॰ हिमवतः स्थानानि गंगातरंगकणशीकरशीतलानि गंगायास्तरंगा
गंगातरंगास्तेषां कणशीकरैः शीतलानि गंगातरंगकणशीकरशीतलानि पुनः १

32

गंगातरंगकणशीकरशीतलानि विद्याधराध्युषितचारुशिलातलानि स्था
नानि किं हिमवतः मलयं गतानि यत्रावमानिपरपिण्डरताः मनुष्याः २२

किं वि॰ हिमवतः स्थानानि विद्याधराध्युषितचारुशिलातलानि विद्याधरैरध्युषितानि
सेवनानि अधिष्ठितानि चारुशिलातलानि येषां तानि एवंविधानि स्थानानि चेन्मनुष्यास्तदा प
रतिरस्कारपिण्डरताः नराः भवेयुः एतावता परावमानं नान्येव स्थानानि सेवनानि वरान् २२

अथान्वयाह यदाश्रीमान्मेरुः युगांताग्निनिहितो निपातनति समुद्राः क्षुभ्यंति किंवि·
समुद्राः प्रचुरनिकरग्राहनिलयाः प्रचुराश्चते निकराः समूहाः ग्राहाणां जलचर
जीवानां निलयाः गृहाणि येषु ते प्रचुरनिकरग्राहनिलयाः अपि पुनः धरा वसुंधरा अं

यदा मेरुः श्रीमान्न पतति युगांताग्निनिहतः समुद्राः क्षुभ्यंति प्रचुरनिकर
ग्राहनिलया धरा गच्छत्यंतं धरणिधरपादैरपि धृता शरीरके का वार्ता करिक
लभकर्णाग्रचपले ॥ २

तंगच्छति विलयं व्रजति किंवि· धराधरणीधरपादैः धृतापि अचलं विना पितरा श
रीरके का वार्ता किंवि· शरीरके करिकलभकर्णाग्रचपले करिकलभानां कर्णाग्रवत् चप
लेकरिकलभकर्णाग्रचपले तस्मिन् ॥ २ ॥

वै

ही

२२ अथान्यदाह हे शंभो अहं एतादृशः कदा भविष्यामि किं वि॰ अहं काकी अद्वितीयः पु
नः किं अहं निस्पृहः पुनरपि किं अहं शांतः पुनरपि किं वि॰ अहं पाणिपात्रः पाणिरेव
करो पात्रं भाजनं यस्य स पाणिपात्रः पुनरपि किं वि॰ अहं दिगंबरः दिश एव अंबरं यस्य स दि

33 गंबरः पुनरपि किं वि॰ अहं कर्मनिर्मूलनक्षमः कर्मणां निर्मूलने कर्मनि

एकाकी निस्पृहः शांतः पाणिपात्रो दिगंबरः कदा शंभो भविष्यामि कर्मनिर्मू
लनक्षमः १४ प्राप्ताः श्रियः सकलकामदुघास्ततः किं दत्तं पदं शिरसि विद्विष
तां ततः किं सन्मानिताः प्रणयिनो विभवैस्ततः किं कल्पस्थितं तनुभृतां तनुभिस्त
तः किं १५

र्मूलने क्षमः कर्मनिर्मूलनक्षमः १४ अथान्यदाह श्रियः लक्ष्मीः प्राप्ताः ततः किं किं वि
श्रियः सकलकामदुघाः सकलमनोरथदोग्ध्र्यः विद्विषतां शिरसि मस्तके पदं दत्तं ततः । रै
किं प्रणयिनः स्नेहिनः विभवैः धनैः सन्मानिताः ततः किं तनुभृतां प्राणिनां तनुभिः श
रीरैः कल्पकालं यावत् स्थितं प्राणितं ततः किं एतावता संसारस्य निर्भमते व वरे श्रेष्ठे २२

अथान्यदाह अतः परं किं वैराग्यमस्ति न किं भक्तिर्भवेमहे शोअन्यच्च हृदि स्थं मरणाजन्मभयं च
अच्चुवं धुषु स्नेहेन अन्यच्च मन्मथजाः कामोद्भवाः विकारा न अन्यच्च वनान्ताः विजनाः जन
रहिताः किं वि॰ वनान्ताः संसर्गदोषरहिताः संसर्गस्य दोषः संसर्गस्य दोषः तेन रहिताः सं
सर्गदोषरहिताः अतोपि वैराग्यं किमपि नास्ति किं वि॰ वैराग्यं परमार्थनीयं परमतत्त्वयु

भक्तिर्भवे मरणाजन्मभयं हृदि स्थं स्नेहो न बंधुषु न मन्मथजा विकाराः संसर्गदो
षरहिता विजना वनान्ता वैराग्यमस्ति किमतः परमार्थनीयं २६ तस्मादनंत
मजरं परमं विकाशि तद्ब्रह्म वांछत जना यदि चेतनस्याः यस्यानुषंगिण इमे
भवनाधिपत्यभोगादयः कृपणलोकरता भवंति २२ ॥

नं २६ अन्यच्चाह हे जना यदि यूयं चेतनस्याः ततस्मात् ब्रह्म वांछत किं वि॰ ब्रह्म अनंतं अं
तरहितं अजरं जरावर्जितं पुनः किं वि॰ ब्रह्म परमं विकाशि यस्य परब्रह्मणः इमे भवनाधि
पत्यभोगादयः अनुषंगिणो भवंति अनपायिनो वर्त्तंते किं वि॰ भवनाधिपत्यभोगादयः कृ

[illegible]

वै॰ टी॰ ३७ 35

अन्यच्चाह रेमठ पातालं आविशासि अयं नभः आकाशं विलेशयासि अनच्च द्विमण्डले
भ्रमसि केन मानसचापलेन मानस चापलेन मानसचापलेन मानसचापलेन ज्ञातेक॰

पाताल माविशसि यासि नभो विलेशय द्विमण्डले भ्रमसि मानसचापलेन ॥
भ्रान्त्यापि जातु विमलेक थमात्मनीयं तद्ब्रह्म न स्मरसि निर्वृतिमेषयेन १८

दाचित्भ्रान्त्यापि तत् ब्रह्म कथं येन स्मरसि येन ब्रह्मणा निर्वृतिमेषि मुक्तिं यासि षिषि॰
विं॰वि॰ ब्रह्म आत्मनीनं कोऽर्थः आत्मनः हितं आत्मनीनं पुनरपि विं॰वि॰ ब्रह्म विमले

१८ वृत्ति ३८

अथास्यन्ताह अहो इति ः एवंअमुनाविधेनामुनासंसारेणकदर्थिताःकस्मात्मोहात्मोहा
त्कथंनलज्जामहे केः व्यापारैः कथंभूतैः व्यापारैः पुनरुक्तभुक्तविषयैः पुनःपुनर्विहि
तानिपुनरुक्तानियानिभुक्तानिभोजनानितैरन्यच्चविषयानि ः बुधाः पंडिताः जंतवः प्रा
णिनः उद्यमिनः उद्यमेनधावंति किंचिज्जंतवः तथैवपुनः २ निभृतप्रारब्धतनक्रि

रात्रिःसैवपुनःसएवदिवसोमत्वाबुधाःजंतवोधावंत्युद्यमिनस्तथैवनिभृतप्रार
ब्धतन्तक्रियाःव्यापारैःपुनरुक्तभुक्तविषयैरेवंविधेनामुना संसारेणकदर्थिता
कथमहोमोहान्नलज्जामहे १५

याः वारं २ निभृताः प्रारब्धतनक्रियायैः तेकिंकृत्वातांरात्रिंमत्वाचान्यत्पुनस्तथैवं
दिवसंमत्वाज्ञात्वायतः सोऽपिपुनरपिरजनीपुनरपिदिवसः पुनरपिमासःपुनरपिवर्षः
पुनरपिवृद्धः पुनरपिबालाः पुनरपि [illegible] यातिसमेतिचकाल ः एवंविधंसंसारस्यस्व
रूपंमत्वातस्मात्संसारात्विरक्ताएवभवंतिनजडाः १५ ॥ रामः ॥

वै॰
टी॰
३५
35

अथान्यदाह यो ऽसौ मुनिः सुखं यथा भवति शेते यस्य मुनेः महीशय्या पृथ्वी स्वापः शयने यस्य मुनेर्विपुलं उपधानं गण्डुकः भुजलताः चान्यच्च वितानं चेल्लोदयः आकाशं अयं अनुकूलः पवनः अजनेनालम्बने चान्यत् चन्द्रः स्फुरद्दीपः चान्यत् विरतिवनितासंगमुदितः उदितो मुनिः कः इव नृपः इव यथा नृपः महीशय्याः पृथ्वी शायिनी शय्या भवति अन्यच्च विपुल उपधानो

महीशय्याशय्याविपुलमुपधानंभुजलता वितानंचाकाशंव्यजनमनुकूलोयमनिलः स्फुरद्दीपश्चन्द्रो विरतिवनितासंगमुदितः सुखंशान्तःशेतेमुनिरतनुभूतिर्नृपइव ८०

भवति विस्तीर्णो गेण्डुवो भवति चान्यत् आकाशे मस्तकोपरि वितानं भवति चान्यत् विजनानिलेन वीजितो भवति अन्यच्च स्फुरद्दीपो भवति अन्यच्च वनितासंगमुदितो भवति किं वि- मुनिः किं विनृपः अतनुभूतिः अतनुर्विभूतिर्विभूतिर्यस्य पदे लक्ष्मीः ८० ३५

अथान्यदाह् हे आत्मन् तत्परब्रह्मलब्ध्वा भोगे रतिं मा कृथाः यस्मिन् परब्रह्मणि एव निश्चयेन॰
त्रैलोक्याधिपतित्वं विरसं वर्त्तते किं वि॰ परब्रह्मणि महाशासने ओ हमते किं वि॰ भोगे आस
नवस्त्रमानघटने आसने सिंहासनखासनादि वस्त्राणि चीनांशुकपट्टकूलादि माने म

सनं

त्रैलोक्याधिपतित्वमेव विरसं यस्मिन्महाशासने तल्लब्ध्वासनवस्त्रमानघटने
भोगे रतिं मा कृथाः भोगः कोऽपि स एक एव परमो नित्योदितो जृम्भते यत्
स्वादात् विरसा भवन्ति विषया त्रैलोक्यराज्यादयः ८।

हत्वाभिमानादि तेषां घटने आसनवस्त्रमानघटने तस्मिन् आसः एवंविधे भोगे का
रतिः कोऽसि स भोगः एक एव परब्रह्म नित्योदितः सन् उज्जृम्भते यत्स्वादात् यस्य॰
ब्रह्मणो रसात् त्रैलोक्यराज्यादयो विषयाः विरसा भवन्ति मोक्षदायकत्वात् ८।

वे· अथान्वयदाह वेदैः किं स्मृतिभिः किं पुराणपठनैः किं शास्त्रैः किंकिंवि· शास्त्रैः महाविस्तरैः महान्
२६ विस्तारो येषां ते महाविस्ताराः तैः महाकर्मक्रियाविभ्रमैः स्वर्गग्रामकुटीनिवासफलदैः स्वर्ग
3b ग्रामस्य कुटी स्वर्गग्रामकुटी तस्यां निवासफलं ददातीति स्वर्गग्रामकुटीनिवासफलदाः तैः

किं वेदैः स्मृतिभिः पुराणपठनैः शास्त्रैर्महाविस्तरैः स्वर्गग्रामकुटीनि
वासफलदैः कर्मक्रियाविभ्रमैः मुक्त्वैकं भवभारदुःखरचनाविध्वं
सकालानलं स्वात्मानंदपदप्रवेशकलनं शेषा वणिग्वृत्तयः ८२

स्वर्गग्राम· एकं स्वात्मानंदपदप्रवेशकलनं भयं स्वकीयो सौ आत्मा तस्य पतत् आनंदपदे स्वा
त्मानंदपदे तस्य प्रवेशकलनं स्वात्मानंदपदप्रवेशकलनं क्रियते किं कृत्वा एकं भवभार
दुःखरचनाविध्वंसकालानलम् शेषाः क्रियाः वणिक्वृत्तयः वणिगाचरणं ८२ २६

अथ यान्मराह॥ हे उत्तमाः ब्रह्मणि परब्रह्मणि आसक्तचित्ता भवत यूयं किं कर्तुं भवभ
याम्भोधिपारं तरीतुं भवभयाम्भोधेः पारः भवभयाम्भोधिपारं तं भवभयाम्भोधिपारे
शेषसमस्तमस्थिरं किं किं आयुः कल्लोललोलं समस्तकल्लोलवत् चपलं याव

आयुः कल्लोललोलं कतिपयदिवसस्थायिनी यौवनश्रीः अर्थाः संकल्प
कल्पाः घनसमयतडिद्विभ्रमा भोगपूगाः कण्ठाश्लेषोपगूढं तदपि च न
चिरं यत्प्रियाभिः प्रणीतं ब्रह्मण्यासक्तचित्ता भवत भवभयाम्भोधिपारं तरीतुं ॥ ७ ॥

नश्रीः कतिपयदिवसस्थायिनी कति दिवसान् स्थातुं शीलमस्याः सा कतिपयदिव
सस्थायिनी अर्थाः संकल्पकल्पाः भोगपूगाः घनसमयतडिद्विभ्रमाः घनसमयतडि
द्वत् विभ्रमो येषां ते घनसमयतडिद्विभ्रमाः प्रियाभिः प्रणीतं यत् कण्ठाश्लेषोपगूढं तत् तदपि न

वै.
२०
37

अथान्यदाह मनस्विनः जितेन्द्रियस्य ब्रह्माण्डमण्डलीमात्रे किं लोभाय जायते अ
पि तु न ब्रह्माण्डस्य मण्डली ब्रह्माण्डमण्डली एवमाचार्यस्य तत्र ब्रह्माण्डमण्डली ब्रह्माण्ड

ब्रह्माण्डमण्डलीमात्रं किं लोभाय मनस्विनः
शफरीस्फुरितेनाब्धेः क्षुब्धता जातु जायते ८४

मण्डलीमात्रे अन्यच्च अब्धेः समुद्रस्य शफरीस्फुरितेन मत्स्यिकाचलनेन जातु कदा
चित् तु क्षुब्धता क्षोभमाना जायते अपि तु न तथा मनस्विनः पुरुषस्य ब्रह्माण्डे लो
भाय न जायते ८४

२०

अथान्यदाह यदा यस्मिन्प्रस्तावे अज्ञानं आसीत् तदाहं इदं अशेषं जगदपि नारीमयं दृष्टं किं लक्षणं अज्ञानं स्मरतिमिरसंस्कारजनितं स्मरस्य कंदर्पस्य यत्तिमिरं अंधकारं तस्य संस्कारेण सर्वं भवोद्भवपरिणामेन जनितं इदानीं सांप्रतं अस्माकं समीभूता दृष्टिः

यदासीदज्ञानं स्मरतिमिरसंस्कारजनितं तदा दृष्टं नारीमयमिदमशेषं जगदपि इदानीमस्माकं पटुतरविवेकांजनजुषां समीभूता दृष्टिः त्रिभुवनमपि ब्रह्म तनुते ८५

समतापरिणामेनालंकृतं चेतः त्रिभुवनमपि ब्रह्म तनुते परब्रह्मस्वरूपं विस्तारयति किंवि० अस्माकं पटुतरविवेकांजनजुषां प्रकृष्टः पटुः पटुतरः पटुतरश्चासौ विवेकः स एव अंजनं तत् पटुतरविवेकांजनं तेन जुषः पटुतरविवेकांजनेन जुषाः सेवनं येषां ते पटुतरविवेकांजनजुषः तेषां पटुः ८५ ॥

वै. श. २८ 38

अथान्यदाह अथयथास्थितंसंसारस्यसत्वंपंचश्लोकैराह: चंद्रमरीचयो: रम्या: वनान्तस्थ-
ली रम्या: किं वि· स्थलीतृणवती शाद्वलतृणयुता: साधु समागम: रम्य: शाम-
सुखं रम्यं काव्येषु कथा रम्या: अन्यच्च प्रियाया: मुखं रम्यं किं वि· रम्यं कोपोपा-

रम्याश्चंद्रमरीचय: तृणवती रम्या वनान्तस्थली रम्य: साधुसमागम: शा-
मसुखं काव्येषु रम्या कथा कोपोपाहितबाष्पबिंदुतरलं रम्यं प्रिया-
या: मुखं सर्वं रम्यमनित्यतामुपगते चित्ते न किंचित्पुन: ८६ ॥

हितबाष्पबिंदुतरलं कोपोपाहितं कोपादुपनिवेशितं यद्बाष्पबिंदुनेन तरलं च
चलं कोपे पुन: अनित्यतां उपगते समासे चित्ते सर्वं रम्यं न किंचित् ८६ ॥

२८

अथान्यदाह एवंविधः तपस्वी कश्चिन्निर्मलः स्थितो वर्त्तते कीदृशः भिक्षाशी भिक्षाभोज
नः पुनः किंवि० तपस्वी जनमध्यसंगरहितः पुनः किंवि० तपस्वी सदासर्वदास्वायत्तचेष्टः
स्वाधीनमानसपरिणामः पुनः कीदृशः तपस्वी दानादानविरक्तमार्गनिरतः दानं अदानं
च दानादाने दानादानयोः विरक्तमार्गः तत्र निरतः सावधानः पुनः कीदृशः तपस्वी रथ्या

भिक्षाशी जनमध्यसंगरहितः स्वायत्तचेष्टः सदा दानादानविरक्तमार्गनिरतः क
श्चित्तपस्वी स्थितः रथ्याकीर्णविशीर्णजीर्णवसनैः संस्थानकंथासखो नि
र्मानो निरहंकृतिः शमसुखाभोगैकबद्धस्पृहः ८७

कीर्णविशीर्णजीर्णवसनैः संस्था
नकंथासखः रथ्यायाः कीर्णानि विशीर्णानि जीर्णानि वसनानि रथ्याकीर्णविशी
र्णजीर्णवसनानि तैः कृत्वा संस्थानकंथासखी पत्नी सहायिनी येन सः पुनरपि की
दृशः तपस्वी निर्मानः मानत्यक्तः पुनः कीदृशः तपस्वी निरहंकृतिः निरहंकारः पु
नः स्वी शमसुखाभोगैकबद्धस्पृहः शमस्य सुखं शमसुखं तस्य आभोगे विस्तारे एकाव

किं दृष्टः प
त

[illegible] नमः शम· ८२

वै॰
२९
39

अथान्यदाह हे मातः मेदिनि हे तात मारुत हे सखे तेजः हे सुबंधो जल हे भ्रातर्व्योम भ
वतां पंचतत्वानां एषः अंत्यप्रणामांजलिः वद्धोस्ति तथा विधेयं यथा परब्रह्मणि ।
लीये लीनो भवामि किं वि॰ अहं युष्मत्संगवशोपजातसुकृतोद्रेकस्फुरन्निर्मल

मातर्मेदिनि तातमारुत सखे तेजः सुबंधो जल भ्रातर्व्योम निबद्ध
एष भवतामंत्यप्रणामांजलिः युष्मत्संगवशोपजातसुकृतोद्रेक
स्फुरन्निर्मल ज्ञानापास्तमोहमहिमा लीये परब्रह्मणि ॥८८॥
समस्त

ज्ञानापास्तसमस्तमोहमहिमा युष्माकं संगः युष्मत्संगः युष्मत्संगवशेन उपजातो यो
सौ सुकृतोद्रेकः तस्य स्फुरन्निर्मलज्ञानेन अपास्ता निराकृता समस्तमोहमहिमा ये
न स युष्मत्संगशोपजातसुकृतोद्रेकस्फुरन्निर्मलज्ञानापास्तसमस्तमोहमहिमा ॥८८॥ २९
व

अथान्यदाह विदुषा पंडितेन आत्मश्रेयसि मोक्षोपाये तावदेव महान प्रयत्नः कार्यः यावदिदं कलेवरगेहं शरीरमंदिरं स्वस्थं वर्त्तते समाधानपरायणं वर्त्तते चान्यच्च यावत् जरा दूरे वर्त्तते यावत् इंद्रियशक्तिः अप्रतिहता वर्त्तते चान्यत् यावत् आयुषः क्षयो नास्ति

यावत्स्वस्थमिदं शरीरमरुजं यावच्च दूरे जरा यावच्चेंद्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः आत्मश्रेयसि तावदेव विदुषा कार्यो प्रयत्नो महान् संदीप्ते भवने प्रकूपखनने प्रत्युद्यमः कीदृशः ८९

८

तावदेव स्वहिते प्रयत्नः कार्यः भवने उद्दीप्ते प्राति प्रदीप्ते सति प्रकूपखनने कीदृशः प्रत्युद्यमः न तु प्रदीपने प्रदीप्ते सति कूपखननेन शाम्यते ८९

वै॰ टी॰ ४०
40

अथान्यदाह भविष्यमिमां विघ्नानस्मभल्ला किं वि॰ विद्यावादिष्ठं दमिनी पुनः किं वि॰
विद्याविनीता विना विनयवन्तः प्रकृष्टस्य योग्या खड्गाग्रैः कृपाणधाराभिः यशः ना
के स्वर्गलोके मतिननीतं किं वि॰ खड्गाग्रैः करिकुंभपीठदलनैः करिणां कुंभपीठं करि

॥ नाभ्युन्नाभ्रु विवादिष्ठं दमनी विद्याविनीता विना खड्गाग्रैः क
रिकुंभपीठदलनैर्नाकं न नीतं यशः कांताकोमलपल्लवाधररसः पीतो न चंद्रोदये नाहत्यं गतमेव निष्फलमहो मस्त्यालये
दीपवत् ४०

कुंभपीठं तद्दलने शीलमेषां ते करिकुंभपीठदलनाः तैः करि चान्यत् चंद्रोदये कां
ताकोमलपल्लवाधररसो न पीतः अहो इति खेदे नाहत्यं यौवनं निष्फलमेव गतं किंवत् मस्य

वैराग्यशतक ४०

अथान्यदाह। सतां सत्पुरुषाणां ज्ञानेमानमदादिनाशो भवति केषांचित् अधमानां एतत् ज्ञाने मद
मानकारणं भवति॥ अमुमेवार्थं कविरह ज्ञातेन हृदयति यन्निनामनीनां विविक्ते स्थाने एका
न्तप्रदेशः विमुक्तये भवति संसारोच्छेदनाय स्मात् कामातुराणां पुरुषाणां तदेव विविक्ते
निर्जने अतिकामकारणं भवति कामविकाराय स्मात्॥ ५॥ अथान्यदाह मनोर्थाः स्फुर

ज्ञाने सतां मानमदादिनाशने केषांचिदेतन्मद मानकारणं॥ स्थानं विमुक्तेर्म
नीनां विमुक्तये कामातुराणामतिकामकारणं॥ ५॥ जीर्णा एव मनोरथाः स्वहृद
ये जाते जरा यौवने हंतांगेषु गुणाश्च वंध्यफलतां जाताः गुणज्ञैर्विना किं यु
क्तं सहसाभ्युपैति बलवान्कालः कृतांतोक्षमी ह्याज्ञातं त्रिपुरांतकांघ्रियुगलं
॥ मुक्त्वास्ति नान्यागतिः॥ ६॥

दये जीर्णा एव यौवने जराव्याप्ते हंतेति खेदे चान्यत् गुणाश्च वंध्यफलतां जाताः कैर्विना गु
णज्ञैर्विना॥ अक्षमी बलवान् कालो यमः सहसा अभ्युपैति किं युक्तं हे निश्चितं आसंमा
द्भावेन ज्ञातं॥ त्रिपुरांतकांघ्रियुगलं मुक्त्वा अन्यागतिर्नास्ति किं वि॰ कालः कृतांतः कृता

वै·री· ५८·

अथान्वयः ॥ प्राणी सलिलं पानीयं पिबति क्व सति आस्ये वदने तृषा शुष्यति सति किं-
वि· सलिलं स्वादु सुरभिः प्राणी क्षुधार्तः सन् शालीन् कवलयति अस्ति किं वि· शा-

तृषा शुष्यत्यास्ये पिबति सलिलं स्वादु सुरभि ॥ क्षुधार्तः सन्
शालीन् कवलयति शाकादिवलितान् ॥ प्रदीप्ते रागाग्नौ
सुदृढतरमाश्लिष्यति वधूं प्रतीकारो व्याधेः ॥ सुखमिति वि-
॥ पर्यस्यति जनः ॥ ५३ ॥

लीनान् शाकादिवलनान् प्राणी रागाग्नौ प्रदीप्ते सति सुदृढतरं यथा भवति वधूं भार्यां
आश्लिष्यति आलिंगति जनः प्राणी व्याधेः प्रतीकारः उपचारः सुखमिव विपर्यस्- ॥ ति विपर्यासं करोति ॥ ५३ ॥

५८

अथान्यदाह॥ हे स्मरारे अहं कदा दुःखं मोक्ष्ये किं कृत्वा गांगैः पयोभिः स्नात्वा हे विभो चान्यत्
त्वां शुचिकुसुमफलैः अर्चयित्वा पुनः किं कृत्वा क्षितिधरकुहरग्रावपर्यंकमूले ध्येयक
र्मणि ध्याने निवेश्य॥ क्षितिधरस्य कुहरे क्षितिधरकुहरे क्षितिधरकुहरस्य पतत्ग्रा॰

स्नात्वा गांगैः पयोभिः शुचिकुसुमफलैरर्चयित्वा विभो त्वां ध्येये ध्याने नि-
वेश्य क्षितिधरकुहरग्रावपर्यंकमूले॥ आत्मारामः फलाशी गुरुवचनर- ॥१२॥
तः त्वत्प्रसादात्स्मरारे दुःखं मोक्ष्ये कदाहं तव चरणरतो ध्यानमार्गैकयत्नैः

वेन दृढव पर्यंकं तस्य मूले क्षितिधरकुहरग्रावपर्यंकमूले तस्मिन् क्षि॰ किं वि॰॥ अहं
आत्मारामः॥ पुनः किं वि॰ अहं फलाशी पुनः किं वि॰ अहं त्वत्प्रसादात् गुरुवचनरतः
पुनः किं वि॰॥ अहं ध्यानमार्गैकयत्नैः तव चरणरतः॥ ६४ ६५ ॥॥

वै. श. ४२

अथान्यदाह येषां पुरुषाणाम् एवंविधा स्थितिः अहं एवं मन्ये त एव परमेश्वराः सा
का स्थितिः शैलशिलाशय्या गिरिगह्वरगृहं तरूणां त्वगेव वसनं सुहृदः सारङ्गाः न
ननिष्ठि ॥

शय्या शैलशिला गृहं गिरिगुहा वस्त्रं तरूणां त्वचः सारङ्गाः सुहृदो न
नु क्षितिरुहां वृत्तिः फलैः कोमलैः येषां नैर्झरमम्बुपानमुचितं रत्ये
व विद्याङ्गना मन्ये ते परमेश्वराः शिरसि यैर्बद्धो न सेवाञ्जलिः ५५

ते क्षितिरुहां तरूणां कोमलैः फलैः वृत्तिः नैर्झरं अम्बुपानं एव निःस्पृहयेन रत्या सह
उचितं अङ्गना विद्या येषां इति स्थितिः ते ईश्वराः यैः शिरसि सेवाञ्जलिर्न निबद्धः ॥५५

अथान्वयाह ॥ हि निश्चितं इदं स्ये स्वेक्रूटं वे अनुकंपायाः पात्रं विभ्रयात् यत्तदोर्नित्यसंबंधः

इति न्यायात् ॥ नरः कोयं विद्वान् ॥ अतीवदुःखासिकानां नारीणां वक्त्रं वीक्ष्य तत्रापि

तत्र कोपि कया विपत्तिज्वरजनितरुजा विपत्तिरेव ज्वरः विपत्तिज्वरः विपत्तिज्वरेण ज

निता रुक् ॥ विपत्तिज्वरजनितरुक् तया वि॰ कस्याः यस्यां त्रिलोकीं स्मरति गंगायाः सत्या

सत्यामेव त्रिलोकीसरिति हरशिरश्चुंबिनी विकटायां सह्यन्ते कल्पयंत्यां वट

विटपभवैर्वल्कलैः सत्फले स्याः कोयं विद्वान् विपत्तिज्वरजनितरुजातीव

दुःखासिकानां वक्त्रं वीक्ष्य तदस्ये यदि हि नि विभ्रयात्स्वकं वेनुकंपा ॥ ९९

मेवं किं वि॰ सरिति हरशिरश्चुंबिनी विकटायां ईश्वरमस्तकस्पर्शिनी विकटः कांचीप्रदेशो

यस्याः सः हरशिरश्चुंबिनी विकटा तस्यां हरः पुनः किं वि त्रिलोकीसरिति सह्यन्ते सदाचारेक

ल्पयंत्यां प्रेरयंत्यां केः सत्फलैः चान्यत वल्कलैः किं वि वल्कलैः वटविटपभवैः वटवृक्षोद्भ

वे·
५३
43

अथान्यदाह नोकाशीपरिहृत्यान्यस्मादहं नऽस्मिल्लेदे विबुधैः किं अन्यत्रस्थीयते
अपितनपश्यां उद्यानेषु विविचित्रभोजनविधिः चान्यत्र तीर्थानि तीर्थेतपः चान्यतस्

उद्यानेषु वि विचित्रभोजनविधिः तीर्थानि तीर्थेतपः कौपीनावरणं स्वव
स्त्रसमितेभिक्षाटनेमंडने आसन्नेमरणं च मंगलसमं यस्यामनुष्ठीयते
नोकाशीपरिहृत्याहं तविबुधैरन्यत्रकिंस्थीयते ५० ॥ ॥

वस्त्रेकौपीनानानावरणं मंडने चान्यत्र यस्यां अमिते भिक्षाटने चान्यत्र यस्यांका
श्यां मंगलसमं आसन्ने मरणं समनुष्ठीयते नोकाशीमन्यकामन्यत्रकथं स्थीयते ५० ५३

अथान्यदाह यदिप्रभुःस्वामीयेषांवचःद्वारेषुस्थित्वास्थित्वाइतिद्रुत्यतिकुप्यतिइतीतिकिं
नायंतेसमयःसंप्रतिप्रस्तावोनास्तिअधुनारहस्यमंत्रालोचःनाथःस्वामीनिद्रातिप्रमी
लांकुरुतेरेचेतःतान्प्रभून्परिहायविश्वेशितुःपरमेश्वरस्यमहतस्यभवनेयाहिकिंभव
नेनिर्दौवारिकनिर्दयोक्तापरुषवाक्योर्थःनिर्गतोदौवारिकोयस्मात् तन्निर्दौवारिकंमतौ ।

नायंतेसमयोरहस्यमधुनानिद्रातिनाथोयदिस्थित्वाद्रक्ष्यतिकुप्यति
प्रभुरितिद्वारेषुयेषांवचः चेतस्तानपहाययाहिभवनंदेवस्यविश्वे
शितु निर्दौवारिकनिर्दयोक्त्यपरुषंनिःसीमशर्मप्रदं ९८

द्वाररहिते निर्दयोक्त्याकठोरोक्त्याअपगतोकृष्टकोपोयस्मात् तन्निर्दयोक्त्यापरुषंनिर्दौ
वारिकंचनिर्दयुक्त्यापरुषंचनिर्दयोक्त्यापरुषंनतपुनः किंभवनंनिस्सीमशर्मप्रदंनिः
सीमंसीमातीतंशर्मसौख्यंप्रददातीतिनिःसीमशर्मप्रदंअनर्गलसौख्यदायकमित्यर्थः

सौ

वै॰ टी॰ ४४
५५

अथान्यदाह ॥ हे प्रियसखे खलो विधिः परामृत्योर्दैवः नो जानीमः अत्र किं विधास्यति ।
अयं विधिः चिंताचक्रे निधाय बलात् पिंडीकृत्य मनो भ्रमयति किं विशिष्टे चिंताचक्रे
विपद्दंडप्रपातपरंपरापरिचयचले ॥ विपदेव दंडः विपद्दंडः तस्य यः प्रपातपरंपरान

प्रियसखि विपद्दंडप्रपातपरंपरापरिचयचले चिंताचक्रे निधाय विधिः खलः ।
मृदमिव बलात् ॥ पिंडीकृत्य प्रगल्भकुलालवत् भ्रमयति मनो नो जानी-
॥ मः किमत्र विधास्यति ॥ ५५ ॥

स्यापरंपरायाः परिचयः तेन चलं स्थ्रं चलः विपद्दंडप्रपातपरंपरापरिचयचलस्तस्मिन्
मनः कमिव मृदमिव विधिः कस्व प्रगल्भकुलालवत् ॥ यथा प्रगल्भकुलालः मृदं मृत्ति-
कां बलात् ॥ पिंडीकृत्य चक्रे निधाय भ्रमयति ॥ एतावता विपरीतविधेः विलसितं कौ ४४

अथान्यदाह । रेकंदर्पकोदंडटंकाररवैः करं किं कदर्थयसि । रे रे कोकिलः कोमलैः
कलिरवैः पंचमस्वरैः किं त्वं वृथा जल्पसि हे मुग्धे कटाक्षैरलं श्रयंतां ।। किं विः कटा
क्षैः स्निग्धविदग्धमुग्धमधुरक्षेपैः स्निग्धस्य विदग्धस्य मुग्धस्य मधुरस्य क्षेपो ये

रेकंदर्पकरंकदर्थयसि किं कोदंडटंकाररवैः ।। रे रे कोकिलको
मलैः कलिरवैः किं त्वं वृथा जल्पसि ।। मुग्धे स्निग्धविदग्धमु
ग्धमधुरैः लोलैः कटाक्षैरलं ।। चेतश्चुंबितचंद्रचूडचरणध्या
।। नामृते वर्तते ।। १०० ।।

षां ते स्निग्धविदग्धमुग्धमधुरक्षेपाः तैः स्निः भवतां एवंविधानां कृतं निरव
लमपि अर्थं अस्माकं चेतः चुंबितचंद्रचूडचरणध्यानामृते वर्तते चुंबितचंद्रचू
डस्य महेशस्य चरणध्यानामृतं येन तत् । चुंबितचंद्रचूडचरणध्यानामृते ।।१००।।

अथान्यदाह मे मम महेश्वरे वा जनार्दने वा महद्देवभेदहेतुः प्रतिपत्तिर्ना-
स्ति किं वि· महेश्वरे जगतां महेश्वरे त्रिभुवनस्याधिपतौ किं किं जनार्द-

महेश्वरे वा जगतां महेश्वरे जनार्दने वा जगदन्तरात्मनि
न भेदहेतुः प्रतिपत्तिरस्ति मे तथापि भक्तिस्तरुणेन्दुशे-
खरे ॥

ने जगदन्तरात्मनि जगतां विश्वत्रयाणां अन्तरात्मा जगदन्तरात्मा तस्मिन्
जग· उभयोर्द्वयोर्मम चेतसं न रं नास्ति न प्यापि तरुणेन्दुशेखरे श्रीमहे-
शे मे मम भक्तिः एषास्ति प्यात्विना भक्तिः ॥

अथान्यदाह योगी सर्वसंगपरित्यागी सुखं तिष्ठति किंवि॰ योगी ध्वस्ताशेषमदप्रमादमुदितः
ध्वस्ता निराकृताः अशेषाः मदप्रमादा येन ध्वस्ताशेषमदप्रमादस्तेन मुदितः ध्वस्ताशेष
मदप्रमा[द]मुदितः यस्य योगिनः शतखंडजर्जरतरं पुनः कंथा तादृशी सर्वाकाशत कौपीनं २
खंडजर्जरतरा निश्चितमशने किं सुखसाध्यमेत्यपसैव न साध्यं सुखसाध्यमेवंविधा

कौपीनं शतखंडजर्जरतरं कंथा पुनस्तादृशी निश्चिंतं सुखसाध्यभैक्ष्यमशनं शय्या
श्मशाने वने मित्रामित्रसमानतातिविमला चिंताथ शून्यालये ध्वस्ता
शेषमदप्रमादमुदितो योगी सुखं तिष्ठति १२

याः भिक्षायाः समूहस्तं भैक्ष्यं सुखसाध्यं भैक्ष्यं अन्यच्च शय्या श्मशाने वने तथा मित्रा
मित्रसमानता मित्रं च अमित्रं च मित्रामित्रौ तयोर्मित्रामित्रयोः तादृश समानता य
स्य यत्र स मित्रामित्रसमानता अथ च शून्यालये अतिविमला अतिनिर्म
ला शुक्लध्यानलक्षणा चिंता अतः कारणात् योगी निर्मुक्तः संसारसुखेन तिष्ठति २

वै॰
टी॰
५८
46

अथान्यदाह रे लोकाश्चेष्टितैः नश्वरविकल्पव्यापारैः कृतं पर्याप्तं यदि चेत् अस्मद्वचः श्रद्धे
यं श्रद्धायोग्यं श्रद्धेयं अनुल्लंघ्यमित्यर्थः तदा स्वधामनि स्वकीयशरीरमंदिरे कामोच्छित्ति
वशे कंदर्पजयार्थं केवलं चेतः समाधीयतां किं वि॰ चेतः आशापाशशतोपशांतिविश
दं आशापाशशतमाशापाशशतं तस्योपशांत्या विशदं निर्मलमाशा॰ यतो भो

भोगा भंगुरवृत्तयो बहुविधास्तैरेव चायं भवस्तत्कस्येह कृते परिभ्रमत रे लो
काः कृतं चेष्टितैः आशापाशशतोपशांतिविशदं चेतः समाधीयतां कामो
च्छित्तिवशे स्वधामनि यदि श्रद्धेयमस्मद्वचः १३

गा भंगुरवृत्तयः भंगुरा विनश्वरा वृत्तिर्येषां ते भंगुरवृत्तयः किं भोगाः बहुविधाः अ
नेकप्रकाराः एवं विनश्वरैर्बहुविधैर्भोगैः अयं भावः संसार एव रे लोकाः तत्तस्मा
त्कारणात्कस्य कृते परिभ्रमत वे भ्रमणं कुरुत १३ ॥ समः ॥ ५८

अथास्मदाह धन्यानांमनुष्याणांमेवस्थितसायुः परिक्षीयते किं वि॰ धन्यानांगिरिकंदरेनिव
सतां धन्यानां किं कुर्वतां परंज्योतिः ध्यायतां येषां धन्यानां मानंदाश्रुजलंनिःशंकशोका
रहिताः शकुनाः पक्षिणः पिबंति किं वि॰ शकुनाअंकेशय्याः उत्संगसमागमात्रूढाः नु॰

धन्यानांगिरिकंदरेनिवसतांज्योतिःपरंध्यायतामानंदाश्रुजलंपिबंतिशकु
नाः निःशंकमंकेशयाः अस्माकंतुमनोरथैः परिचितप्रासादवापीतटक्री
डाकाननकेलिकौतुकजुषामायुःपरिक्षीयते१०४॥

पुनः अस्माकमधन्यानांमायुरेवंमनोरथैः परिक्षीयते किं वि॰ अस्माकं परिचितप्रासाद॰
वापीतटक्रीडाकाननकेलिकौतुकजुषां परिचिताः याः प्रासादवापीतटक्रीडाकानन॰
केलयः तासां कौतुकैः जुषंतीति परिचितप्रासादवापीतटक्रीडाकाननकेलिकौतुक॰

वैराग्यश ✱ १०८

वै॰ टी॰ ५८

47

अथान्यदाह एभिंप्रकारैः किं न ग्रस्तं अन्यच्च केन जनाः न ग्रस्ताः मरणेन जन्म आक्रा-
न्तं स्वरूपमित्यर्थः अत्युज्ज्वलं यौवनं जरया आक्रान्तं संतोषं धनलिप्सया संतोषः आक्रान्तः
प्रौढांगनविभ्रमैः शमसुखमाक्रान्तं ग्रस्तं मत्सरिभिर्लोकैः गुणाः आक्रान्ताः विना-

आक्रान्तं मरणेन जन्म जरया चात्युज्ज्वलं यौवनं संतोषो धनलिप्सया शमसु-
खं प्रौढांगनाविभ्रमैः लोकैर्मत्सरिभिः गुणा वनभुवो व्यालैर्नृपा दुर्ज-
नैरस्थैर्येण विभूतिरप्युपहता ग्रस्तं न किं केजनाः १५ ॥

शिताः व्यालैः दुष्टगजैर्वनभुवो आक्रान्ता दुर्जनैर्नृपाः भूपालाः आक्रान्ता ग्रस्ता वि-
भूतिरपि अस्थैर्येण आक्रान्ता उपहता इत्यर्थः नहि कालेन किं किं न विनश्यति ॥ ५८

अथान्यदाह नाम इति संबोधनेन तत्किं यन्निरंकुशेन विधिना निरांशंकेन विधिना दैवेन
सुस्थितं निर्मितं किं तत् वयसि शरीरे आधिव्याधिशतैः अतितरामतिशयेन आरो
ग्यमुन्मील्यते तत्र आधिर्मानसी पीडा व्याधी रोगसमुद्भवः अन्यत् यस्मिन्नेव निर्मी

आधिव्याधिशतैर्वयस्य नितरामारोग्यमुन्मूल्यते लक्ष्मीर्यत्र पतन्ति त
त्र विवृत द्वारा इव व्यापदः जातं जातमवश्यमाशु विवशं मृत्युः करो
त्यात्मसात् तत्किं नाम निरंकुशेन विधिना यन्निर्मितं सुस्थितं १८ ॥

ऽत्र लक्ष्मीः पत्रिवत् पत्नीवत् पतन तस्यानावर्तन्ते व्यापदः विवृतद्वारा इव उद्घाटि
तकपाटा इव वर्तन्ते अवश्यं निश्चितमाशु शीघ्रं मृत्युर्यमः जातं उत्पन्नं १ आत्मसात्क
रोति आत्मायत्तं विधत्ते ततः अस्य दैवस्य निर्माणे किमपि सुस्थितं नास्तीत्यागमः ६ ॥

वै॰ श॰ ४८ 48

अथान्यदाह रेमनुष्याः वदंतु कथ्यंतु यदि चेत् संसारे स्वल्पमपि सुखं किंचिदस्ति गर्भ
मध्येऽमा कृच्छ्रेण कष्टेन नियमिततनुभिः संकोचितशरीरैः स्थीयते किंवि॰ गर्भमध्ये अमेध्य
मध्ये अमेध्यमध्ये पुरीषे तदमेध्यमध्यं तस्मिन् न्न॰ अस्मिन्संसारे यौवने विप्रयोगः किं॰
वि॰ यौवने कांताविश्लेषदुःखव्यतिकरविषमे कांतायाः विश्लेषः कांताविश्लेषः कांता

कृच्छ्रेणामेध्यमध्ये नियमिततनुभिः स्थीयते गर्भमध्ये कांताविश्लेषदुःखव्य
तिकरविषमे यौवने विप्रयोगः नारीणामप्यवज्ञा विलसति नियतं वृद्धभा
वोऽप्यसाधुः संसारे रे मनुष्याः वदंतु यदि सुखं स्वल्पमप्यस्ति किंचित् १०२

विश्लेषस्य यो सौ दुःखव्यतिकरस्तेन विषमः कांताविश्लेषदुःखव्यतिकरविषमः
तस्मिन् कांता॰ अपि पुनः नारीणामवज्ञा अवगणनं विलसति अपि पुनः नियतं नि
श्चितं वृद्धभावः असाधुः अस्मात्कारणात्संसारे किमपि सौख्यं नास्ति ८२ ॥ १०२॥

अथान्यदाह ॥ प्राणिनां सौख्यं कुतः कथं नृणां मनुष्याणां आयुर्वर्षशतं परिमितं तस्यायुषो
वर्षशतप्रमाणस्य अर्द्धं रात्रौ गतं शयानस्य ततोऽनंतरं शेषं पंचाशत तस्य अर्द्धस्य पंचाश
त अर्द्धस्य करा विटपि अधिकमर्द्धमपि बाल्यत्ववृद्धत्वयोर्गतं शेषमायुः व्याधिवियो

आयुर्वर्षशतं नृणां परिमितं रात्रौ तदर्द्धीकृतं तस्यार्द्धस्य परस्य चार्द्धमपरं बा-
ल्यत्ववृद्धत्वयोः शेषं व्याधिवियोगदुःखसहितं सेवादिभिर्नीयते जीवे
वारितरंगचंचलतरे सौख्यं कुतः प्राणिनां ॥ ८ ॥ अभिगतमहाग्रंथिप्रभेदग-
रीयसी गुरुतरगुणग्रामांभोजस्फुटोज्ज्वलचंद्रिका विपुलविलसल्लज्जावल्ली
विहारकुठारिका जठरपिठरी दुःपूरेयं करोति विडंबनां ॥ ९ ॥

गशोकसहितं सेवादिभिः कर्मभिर्नीयते किंवि- जीवितव्ये वारितरंगचंचलतरे वारिणः २
समुद्रस्य तरंगाः वारितरंगास्तद्वत् चंचलतरः वारितरंगचंचलतरः तस्मिन्वारि ॥ ८ ॥
अथान्यदाह ॥ दुःपूरा जठरपिठरी उदरकोष्ठिका विडंबनां करोति प्राणिनां विगो-

अथ यान्येषां टीका नास्ति ब्रह्मज्ञानविवेकिनो मलधियः कुर्वंत्यहो दुष्करं यन्मुंचंत्युपभोग
भांज्यपि धनान्येकांततो निःस्पृहाः नप्राप्तानि पुरा न संप्रति न च प्राप्तो दृढप्रत्यया वांछा
मात्रपरिग्रहाण्यपि परं त्यक्तुं न शक्ता वयं ॥१० व्याघ्रीव तिष्ठति जरा परितर्जयंती रोगा
श्च शत्रव इव प्रहरंति देहं आयुः परिस्रवति भिन्नघटादिवांभो लोकस्तथाप्यहि
तमाचरतीति चित्रं ॥११ भोगास्तुंगतरंगभंगचपलाः प्राणाः क्षणध्वंसिनः स्तोकान्येव दि
नानि यौवनसुखस्फूर्तिः प्रियेष्वस्थिरा तत्संसारमसारमेव निखिलं बुद्ध्वा बुधा बोधकैः
लोकानुग्रहपेशलेन मनसा यत्नः समाधीयतां ॥१२ सृजति तावदशेषगुणाकरं पुरुष
रत्नमलंकरणं भुवः तदनु तत्क्षणभंगि करोति चेदहह कष्टमपंडितता विधेः ॥१३
जातः कूर्मः स एकः पृथुभुवनभरायार्पितं येन पृष्ठं श्लाघ्यं जन्म ध्रुवस्य भ्रमति निय
मितं यत्र तेजस्विचक्रं संजातव्यर्थपक्षाः परहितकरणे नोपरिष्टान्न चाधो ब्रह्मा
ण्डोडुंबरांतर्मशकवदपरे जंतवो जाततनष्टाः ॥१४ क्षणं बालो भूत्वा क्षणमपि युवा काम
रसिकः क्षणं वित्तैर्हीनः क्षणमपि च संपूर्णविभवः जराजीर्णैरंगैर्नट इव वलीम

वै॰ श॰ प॰
50

उतत्तनरः संसारे के विशति यमधानीयवनिका ॥ १५ पातालान्न समुद्धृतो बत बलि
र्मृत्युर्न्न नीतः क्षयं नोन्मृष्टशशलाञ्छनस्य मलिनं नोन्मूलिता व्याधयः शेषस्यापि
धरां विधृत्य न कृतो भारावतारः क्षणं पुरुषाभिमानगणनां मिथ्यावहह्रि
यसे १६ प्रशान्तशास्त्रार्थविचारचापलैर्निवृत्तनानारसकाव्यकौतुके निरस्तनिः
शेषविकल्पविप्लवं प्रपत्तुमन्विच्छति शंकरं मनः १७ आघ्राय पुस्तकं धन्याः सर्वविष
इति स्थिताः शान्तकृत्वा पश्यन्ति हानविज्ञोजडावयं १८ धिक्कां जीवितमापदेव
निलयं पित्रामवधःविर्जिते दीनानाथजनोपकारककरणव्यापारदूरीकृते मंदीः
भ्रतपापकशोषपदद्वन्द्वारविंदस्मृति व्यालोलायतलोचनास्तनतटप्रस्तेषः
विश्लेषितं १९ भोगे रोगभयं स्खे वत्तयमयं वित्ते नृपाज्ञो भयं दारो शोसाभिभयं जये रि
पुभयं वपुशोकृत्यो बिडूयं नादेहस्तां मा नेम्हानिभयं यरणो खलभयं नाइयं सर्वं नाम
भयंभयंभयमहो वैराग्यमेवाभयं २० इति भर्तृहरिकृतीयमपरखंडसटीकायां वै
राग्यशतकेनाम शतकं संपूर्णं समाप्तं ॥ संवत् १६ २५ मते मार्गसुदे द्वितीयामेगा
७ ७ लवामरायांलिखितं सम्मरतसर मठे मयां पंडितकाश्मीरेस्वपठनार्थं शिरोंवृक्ष

टेहेकतां ४ मर

५०